# Yajnikyupanishad Vivarana, commentary

# યાજ્ઞિક્યુપનિષદ્વિવરણમ્

## Document Information

Text title : krishna-yajurvede taittiriya-aranyake yaajnikyupanishhadvivaraNam.h

File name : yajnikibhaashhya.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : shriipurushhottamaanandatiirtha

Transliterated by : Wim en Esther (wkl-evdk at knoware.nl) upaniShad text by Sunder Hattangadi

Proofread by : Wim en Esther (wkl-evdk at knoware.nl) wkl-evdk at ision.nl

Description-comments : krishna-yajurvede taittiriya-aranyake with commentary by shrIpuruShottamAnandatIrtha

Latest update : April 5, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# યાજ્ઞિક્યુપનિષદ્વિવરણમ્

તૈત્તિરીયોપનિષદિ યાજ્ઞિક્યુપનિષદ્વિવરણમ્
શ્રીપુરુષોત્તમાનન્દતીર્થવિરચિતમ્

શ્રીરામં કાશિકાકાન્તં શંકરાચાર્યમુત્તમમ્ ।
સુરેશં વાર્તિકાચાર્યં નૌમિ વિદ્યાગુરૂનપિ ॥ ૧॥

બ્રહ્મામૃતપ્રચુરશંકરરસ્યરાજદ્રામાયણામૃતરસજ્ઞરસજ્ઞવિજ્ઞાન્ ।
શ્વઃશ્રેયસપ્રદકૃપાનિલયાન્ પ્રણૌમિ શ્વઃશ્રેયસાય મહતે
શિવરામતીર્થાન્ ॥ ૨॥

વારુણ્યુપનિષદ્યુક્તા બ્રહ્મવિદ્યા સસાધના ।
યાજ્ઞિક્યાં ખિલરૂપયાં સર્વશેષો વિધીયતે ॥ ૩॥

બૃહદારણ્યકે યદ્વત્સપ્તમાષ્ટમયોર્મતમ્ ।
ખિલકાણ્ડત્વમત્રાપિ યાજ્ઞિક્યાસ્તદ્વદિષ્યતે ॥ ૪॥

વક્તવ્યમવશિષ્ટં યત્કર્મકાણ્ડાદિષુ ત્રિષુ ।
તત્સર્વમુચ્યતે યત્ર તસ્ય સ્યાત્ખિલકાણ્ડતા ॥ ૫॥

અમ્ભસ્ય પાર ઇત્યાદૌ બ્રહ્મતત્ત્વં સમીરિતમ્ ।
ઉપાસ્તિરુક્તાદિત્યો વા એષ ઇત્યાદિકે હરેઃ ॥ ૬॥

કર્માણ્યુક્તાનિ ભૂરન્નમિત્યાદૌ તત્ર કર્મણામ્ ।
વાહુલ્યાદ્યાજ્ઞિકીત્યેષા નનુ ચોપનિષત્કથમ્ ॥ ૭॥

આદૌ બ્રહ્મોક્તિતોઽન્તે સ્યાત્તદ્ધીહેતૂક્તિતશ્ચ સા ।
આદાવિતિ । અન્ત ઇતિ; અન્તે ચ બ્રહ્મજ્ઞાનસાધનોક્તેઃ, સા;
ઉપનિષદ્ભવતીત્યર્થઃ ॥

અમ્ભસ્ય પારે ભુવનસ્ય મધ્યે
નાકસ્ય પૃષ્ઠે મહતો મહીયાન્ ।

શુક્રેણ જ્યોતીꣳષિ સમનુપ્રવિષ્ટઃ
પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ ॥

1.1
આદાવાદ્યાનુવાકસ્ય બ્રહ્મતત્ત્વાવબોધિકાઃ ॥ ૮॥

ઋચઃ કાશ્ચન તત્રૈષા પ્રથમા સમ્પ્રવર્તતે ।
જલસ્ય પરતીરે યો લોકાલોકાદિકો મહાન્ ॥ ૯॥

યઃ પૃથિવ્યાદિલોકસ્ય મધ્યે મેર્વાદિકો મહાન્ ।
સ્વર્ગલોકસ્ય પૃષ્ઠે યો બ્રહ્મલોકાદિકો મહાન્ ॥ ૧૦॥

તતોઽપ્યસ્માત્સમન્તાચ્ચ મહેશઃ સ્યાન્મહત્તરઃ ।
અનુપ્રવિષ્ટશ્ચેતાંસિ જીવચૈતન્યરૂપતઃ ॥ ૧૧॥

ગર્ભે બ્રહ્માણ્ડરૂપેઽન્તર્વિરાડ્રૂપોઽવતિષ્ઠતે ।
માયયા વ્યાપકોઽપીશો બ્રહ્માણ્ડસ્થો વિરાટ્તયા ॥ ૧૨॥

દેહેષુ જીવરૂપેણ સ્થિત ઇત્યર્થ ઈરિતઃ ।
editor: જલસ્ય; સમુદ્રજલસ્યેત્યર્થઃ । વિરાટ્તયા;
વિરાડ્રૂપેણેત્યર્થઃ ।
અગ્નિર્મૂર્ધા ચક્ષુષીતિ વિરાડ્રૂપં ચ મુણ્ડકે ॥ ૧૩॥

અગ્નિઃ પ્રકાશસંયુક્તો દ્યુલોકોઽત્રાભિધીયતે ।
editor: ઇતિ મુણ્ડકે કથિતમિત્યર્થઃ ।
યસ્મિન્નિદꣳ સં ચ વિ ચૈતિ સર્વં
યસ્મિન્ દેવા અધિવિશ્વે નિષેદુઃ ।
તદેવ ભૂતં તદુ ભવ્યમા ઇદં
તદક્ષરે પરમે વ્યોમન્ ॥

1.2
સમેતિ ચ વ્યેતિચેદં યસ્મિન્નવ્યાકૃતે જગત્ ॥ ૧૪॥

સમુત્પન્નં સંગતં સ્યાત્સૃષ્ટકાલેઽથ સંહૃતૌ ।
વિલીનં વિગતં ચ સ્યાદ્યસ્મિન્નવ્યાકૃતેઽધિકે ॥ ૧૫॥

અધિશબ્દોઽધિકાર્થઃ સ્યાદધિકા ઇતિ યુજ્યતે ।
દેવા હિરણ્યગર્ભાદ્યા નિષેદુર્નિતરાં શ્રિતાઃ ॥ ૧૬॥

તદેવાવ્યાકૃતં ભૂતમતીતં જગદુચ્યતે ।
ભવિષ્યદ્વર્તમાનં ચ તદેવાસીદિદં જગત્ ॥ ૧૭॥

આસીદર્થક આકારો યદ્વાશ્ચર્યસ્ય વાચકઃ ।
તદપ્યવ્યાકૃતં નિત્યે સમુત્કૃષ્ટે પરાત્મનિ ॥ ૧૮॥

શ્રુતૌ શં ચેતિ પાઠે સુખમપિ પ્રાપ્નોતીત્યર્થઃ । વ્યત્યયેન
વા સમિતિ દ્રષ્ટવ્યમ્ ।
યેનાવૃતં ખં ચ દિવં મહી ચ
યેનાદિત્યસ્તપતિ તેજસા ભ્રાજસા ચ ।
યમન્તઃ સમુદ્રે કવયો વયન્તિ
યદક્ષરે પરમે પ્રજાઃ ॥

1.3

પૂર્વમવ્યાકૃતં પ્રોક્તં પરબ્રહ્મસમાશ્રિતમ્ ।
તેનોપહિતચૈતન્યં જગદ્ધેતુરિહોચ્યતે ॥ ૧૯॥

યેનાન્તરિક્ષલોકશ્ચ દ્યુલોકો વ્યાપ્ત ઉચ્યતે ।
ભૂલોકશ્ચ ચકારાભ્યાં દેહાસ્તલ્લોકવાસિનઃ ॥ ૨૦॥

તપત્યનુગૃહીતઃ સન્ યેનેશેનાખિલં જગત્ ।
સ્વીયભાસ્વરરૂપેણ કુરુતે સમ્પ્રકાશિતમ્ ॥ ૨૧॥

રશ્મિલક્ષણદીપ્ત્યા ચ સંતમં કુરુતે રવિઃ ।
તત્ત્વજ્ઞા જગતો મધ્યે તન્તૂનિવ વયન્તિ યમ્ ॥ ૨૨॥

યથા પટસ્વરૂપે ચ તન્તવોઽનુગતાસ્તથા ।
જગત્યનુગતં બ્રહ્મ સદા પશ્યન્તિ સૂરયઃ ॥ ૨૩॥

તદ્બ્રહ્મ નિત્યે પરમે સ્વસ્મિન્ સ્થિત્વા સૃજેત્પ્રજાઃ ।
સ્વરૂપેઽવસ્થિતિશ્ચાસ્ય સ્વે મહિમ્નીતિ સંશ્રુતા ॥ ૨૪॥

આધારાન્તરરાહિત્યં ભવેત્સ્વસ્મિન્નવસ્થિતઃ ।
યતઃ પ્રસૂતા જગતઃ પ્રસૂતી
તોયેન જીવાન્ વ્યચસર્જ ભૂમ્યામ્ ।
યદોષધીભિઃ પુરુષાન્ પશૂँશ્ચ
વિવેશ ભૂતાનિ ચરાચરાણિ ॥

1.4

પૂર્વમવ્યાકૃતોપાધિ યચ્ચૈતન્યં સમીરિતમ્ ॥ ૨૫॥

જગત્કારણતા તસ્ય મન્ત્રેઽસ્મિન્ સમ્પ્રપઞ્ચ્યતે ।
યસ્માત્પ્રસૂતિર્જગતોઽવ્યાકૃતોપહિતાત્મનઃ ॥ ૨૬॥

પ્રસૂતા સમ્પ્રવૃત્તા સ્યાદીકારશ્છાન્દસઃ શ્રુતૌ ।
તત્પઞ્ચભૂતૈરસૃજદ્ દેહાન્ ભૂમ્યાં નરાદિકાન્ ॥ ૨૭॥

editor: વ્યચસર્જેતિ પાઠેઽપિ વ્યસસર્જેત્યેવ વિજ્ઞેયમ્ ।
વિશેષેણાસૃજદિત્યર્થઃ ।
યદ્ બ્રીહ્યાદ્યુપલક્ષ્યાન્નં ભૂત્વા દેહાંશ્ચરાચરાન્ ।
વિવેશ નરપશ્વાદીન્ વૃક્ષાદૌ વૃષ્ટિરૂપતઃ ॥ ૨૮॥

પ્રવેશોઽભ્યુપગન્તવ્યસ્તેનેદં પાલિતં જગત્ ।
editor: શ્રુતાવપેક્ષિતં પૂરયતિ—તેનેતિ । ચૈતન્યેનેત્યર્થઃ ।
શ્રુતિસ્થભૂતાનીત્યસ્ય વ્યાખ્યા દેહાનિતિ ।
અતઃ પરં નાન્યદણીયસꣳ હિ
પરાત્પરં યન્મહતો મહાન્તમ્ ।
યદેકમવ્યક્તમનન્તરૂપં
વિશ્વં પુરાણં તમસઃ પરસ્તાત્ ॥

1.5
નિરૂપ્યતેઽત્ર શુદ્ધં તત્કારણત્વોપલક્ષિતમ્ ॥ ૨૯॥

હિરણ્યગર્ભાદ્યુત્કૃષ્ટાદ્યદ્વસ્તૂત્કૃષ્ટમુચ્યતે ।
મહતો ગગનાદેર્યન્મહાન્તં મહદીરિતમ્ ॥ ૩૦॥

સજાતીયાદિરહિતમિન્દ્રિયાદેરગોચરમ્ ॥

અપરિચ્છિન્નરૂપં ચ સમસ્તજગદાત્મકમ્ ॥ ૩૧॥

અનાદિસિદ્ધં તમસઃ પૃથગ્યદ્વસ્તુ વર્તતે ।
અતોઽન્યત્પરમુત્કૃષ્ટમતિદુર્લક્ષ્યવસ્તુ ન ॥ ૩૨॥

editor: ન, નાસ્તીત્યર્થઃ ।
તદેવર્તં તદુ સત્યમાહુસ્તદેવ
બ્રહ્મ પરમં કવીનામ્ ।
ઇષ્ટાપૂર્તં બહુધા જાતં જાયમાનં
વિશ્વં બિભર્તિ ભુવનસ્ય નાભિઃ ॥

1.6

સમસ્તજગદાત્મત્વમુક્તં યત્તત્પ્રપઞ્ચ્યતે ।
યચ્ચિન્તનં યથાવસ્તુ તદૃતં પરિકીર્તિતમ્ ॥ ૩૩॥

વાચા તદુક્તિઃ સત્યં સ્યાદ્ભવેદ્બ્રહ્મૈવ તદ્ દ્વયમ્ ।
વિબુધાનાં પરં શ્રેષ્ઠં પ્રમાણત્વેન સત્કૃતમ્ ॥ ૩૪॥

બ્રહ્મ વેદાત્મકં વસ્તુ તદેવ બ્રહ્મ કીર્તિતમ્ ।
યાગાદિ વૈદિકં સ્માર્તં વાપીકૂપાદિ કર્મ ચ ॥ ૩૫॥

બ્રહ્મૈવ લોકસ્યાધારો દધાતિ સકલં જગત્ ।
અતોઽધિષ્ઠાનરૂપં સ્યાદાધેયં સકલં જગત્ ॥ ૩૬॥

editor: ભુવનસ્ય નાભિરિત્યસ્યાર્થમાહ—લોકસ્યાધાર ઇતિ ।
બહુધેત્યાદિ
બિભર્તીત્યન્તસ્યાર્થમાહ—દધાતીતિ । ધત્ત ઇત્યર્થઃ ।
તદેવાગ્નિસ્તદ્વાયુસ્તત્સૂર્યસ્તદુ ચન્દ્રમાઃ ।
તદેવ શુક્રમમૃતં તદ્બ્રહ્મ તદાપઃ સ પ્રજાપતિઃ ॥

1.7

તદેવાગ્ન્યાદિકં શુક્રં નક્ષત્રાદ્યમૃતં સુધા ।
હિરણ્યગર્ભબ્રહ્માપિ તદેવ પરિકીર્તિતમ્ ॥ ૩૭॥

આપઃ પઞ્ચાપિ ભૂતાનિ વિરાડાખ્યપ્રજાપતિઃ ।
તદેવ તદધિષ્ઠાનં બ્રહ્મૈવ પરિકીર્ત્યતે ॥ ૩૮॥

અવિદ્યાદૃષ્ટિતો યદ્યદ્ભાતિ નાનાવિધં જગત્ ।
વિદ્યાદૃષ્ટ્યા સમસ્તં તદ્બ્રહ્મૈવાખણ્ડમુચ્યતે ॥ ૩૯॥

editor: તદેવાગ્નિરિત્યદિ ચન્દ્રમા ઇત્યન્તસ્યાથમાહ—તદેવેતિ ।
બ્રહ્મૈવેત્યર્થઃ । શુક્રામૃતપદયોરર્થમાહ—
શુક્રમિત્યાદિસુધેત્યન્તેન
। શુક્રં દીપ્યમાનમિતિ વાચ્યાર્થઃ ॥

સર્વે નિમેષા જજ્ઞિરે વિદ્યુતઃ પુરુષાદધિ ।
કલા મુહૂર્તાઃ કાષ્ઠાશ્ચાહોરાત્રાશ્ચ સર્વશઃ ॥

અર્ધમાસા માસા ઋતવઃ સંવત્સરશ્ચ કલ્પન્તામ્ ।

સ આપઃ પ્રદુધે ઉભે ઇમે અન્તરિક્ષં ચાપિ સુવઃ ॥

footnoteઅથો સુવઃ ઇતેવ પ્રાયિકઃ પાઠઃ

1.8, 1.9

i.v. says antarikShamatho instead

- પ્રકૃતિઃ પુરુષશ્ચૈવ નિત્યૌ કાલશ્ચ સત્તમ । -

ઇતિ કલસ્ય નિત્યત્વાદ્ બ્રહ્મતાસ્ય ન હીતિ ચેત્ ॥ ૪૦॥

અવિદ્યાદૃષ્ટિવિષયં પુરાણવચનં હિ તત્ ।
વિદ્યાદૃષ્ટ્યા તુ કાલસ્ય બ્રહ્મરૂપત્વમિષ્યતે ॥ ૪૧॥

ઇત્યભિપ્રેત્ય તસ્યાપિ તસ્માદુત્પત્તિરુચ્યતે ।
નિમિર્વસતિ યેષ્વક્ષ્ણઃ પક્ષ્મપાતેષુ તે સ્મૃતાઃ ॥ ૪૨॥

નિમિષા નિમિષા એવ નિમેષાઃ પરિકીર્તિતાઃ ।

editor: નિમિર્નામ જનકસ્ય પૂર્વજ આદ્યો મિથિલેશ્વર

આસીદિત્યુપનિષદિ

વર્તતે । સ દેવવરપ્રસાદાત્ પક્ષ્મપાતેષુ તિષ્ઠતીતિ

જ્ઞેયમ્ ।

પક્ષ્મપાતપ્રમાણોઽયં કાલો નિમિષશબ્દિતઃ ॥ ૪૩॥

તે સ્વપ્રકાશાત્સમ્પૂર્ણાત્પરેશાદધિજજ્ઞિરે ।
નિમેષેભ્યોઽધિકાઃ કાષ્ઠાઃ કલાસ્તાભ્યોઽધિકા મતાઃ ॥ ૪૪॥

અષ્ટાદશ નિમેષાસ્તુ કાષ્ઠા ઇત્યાદિકસ્મૃતેઃ ।
ચકારાભ્યામનુક્તસ્ય લવાદેરપિ સંગ્રહઃ ॥ ૪૫॥

તચ્ચ સર્વશ ઇત્યુક્ત્યા વિસ્પષ્ટં પરિકીર્તિતમ્ ।
લવત્રુટ્યાદિકાઃ સર્વે સમુત્પન્નાઃ પરાત્મનઃ ॥ ૪૬॥

નલિનીપત્રસંહત્યાં સૂક્ષ્મસૂચ્યા વિભેદને ।
દલે દુલે તુ જઃ કાલઃ સ કાલો લવવાચકઃ ॥ ૪૭॥

લવૈસ્ત્રુટિઃ સ્યાત્ ત્રિંશદ્ભિરિત્યાદ્યુક્તં મનીષિભિઃ ।
પક્ષમાસાદયઃ સર્વે મહેશાદધિજજ્ઞિરે ॥ ૪૮॥

સંવત્સરો મહેશાનાત્કલ્પતાં પ્રભવાદિકઃ ।
સમુત્પન્નોઽત એવાયં સમર્થઃ સ્વપ્રયોજને ॥ ૪૯॥

editor: કલ્પન્તામિતિ પાઠેઽપિ સર્વે કાલવિશેષાઃ
સ્વસ્વપ્રયોજનસમર્થા ઇતિ યોજ્યમ્ ।
સ કાલોપહિતસ્તત્તત્કાલૌચિત્યેન દુગ્ધવાન્ ।
જલોપલક્ષિતાં પૃથ્વીં પ્રાણિનામભિકાઙ્ક્ષિતમ્ ॥ ૫૦॥

ભોગ્યં સમ્પાદયામાસ પૃથિવ્યાં પરમેશ્વરઃ ।
editor: સ આપઃ પ્રદુઘ ઇત્યસ્ય તાત્પર્યમાહ—પ્રાણિનામિત્યાદિના ।
અન્તરિક્ષં સુવઃ સ્વર્ગમપિ ચેમે ઉભે અપિ ॥ ૫૧॥

પ્રદુઘે સ્થાનયોર્ભોગ્યં તયોરજનયત્પ્રભુઃ ।
editor: અપિચેતિ અથોશબ્દાર્થઃ ।
નૈનમૂર્ધ્વં ન તિર્યઞ્ચં ન મધ્યે પરિજગ્રભત્ ।
ન તસ્યેશે કશ્ચન તસ્ય નામ મહદ્યશઃ
ન સંદૃશે તિષ્ઠતિ રૂપમસ્ય
ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ।
હૃદા મનીશા મનસાભિક્લૃપ્તો
ય એનં વિદુરમૃતાસ્તે ભવન્તિ ॥

1.10, 1.11 /1
કાલાદિસર્વહેતુત્વાત્સર્વત્રાનુગતત્વતઃ ॥ ૫૨॥

કુતો ન ગૃહ્યતે સર્વૈરિતિ ચેત્તન્ન યુજ્યતે ।
ઊર્ધ્વાદ્યાકારરાહિત્યાદ્રૂપાદેરપ્યભાવતઃ ॥ ૫૩॥

પુરુષઃ કશ્ચિદપ્યેનં ન ગૃહ્ણાત્યૂર્ધ્વતાકૃતિમ્ ।
તિર્યગાકારયુક્તં વા ક્વચિન્મધ્યે સ્થિતં ચ વા ॥ ૫૪॥

તસ્યાત્મનો ન કોઽપીશે નેષ્ટ ઇત્યર્થ ઈરિતઃ ।
મમ ગ્રહણસિદ્ધ્યર્થં ત્વમીદૃગ્રૂપવાન્ ભવ ॥ ૫૫॥

ઇતિ તં પરમાત્માનં નિયન્તુ ન હિ શક્નુયાત્ ।
અત એવાત્મનો નામ મહદ્યશ ઇતિ સ્થિતમ્ ॥ ૫૬॥

અતિસ્વાતન્ત્ર્યતસ્તસ્ય યશમોઽભ્યધિકત્વતઃ ।
ન દૃષ્ટવિષયે રૂપં તિષ્ઠત્યસ્ય પરાત્મનઃ ॥ ૫૭॥

કુશલોઽપિ પુમાન્ કશ્ચિચ્ચક્ષુષા તં ન પશ્યતિ ।
કથં બ્રહ્માવબોધઃ સ્યાદિતિ ચેદભિધીયતે ॥ ૫૮॥

લૌકિકાર્થમનોવૃત્તીર્યદીષ્ટે તેન ચેતસા ।
નિશ્ચિતો હૃદયસ્થેન પરમાત્મા ભવેદયમ્ ॥ ૫૯॥

મનો હિ યોગયુક્તં સદ્વૃત્તીરણ્યા નિયચ્છતિ ।
તેનૈકાગ્રેણ મનસા પરમાત્માનુભૂયતે ॥ ૬૦॥

એકાગ્રમનસૈનં યે સાક્ષાત્કુર્વન્તિ તે નરાઃ ।
દેહાત્પ્રાણવિનિષ્ક્રાન્તિર્મરણં તદ્વિવર્જિતાઃ ॥ ૬૧॥

અદ્ભ્યઃ સંભૂતો હિરણ્યગર્ભ ઇત્યષ્ટૌ ॥

1.11 /2
ઉક્તાર્તસ્ય દૃઢત્વાય પ્રદેશાન્તરવર્તિનઃ ।
મન્ત્રાનુદાહરત્યદ્ભ્યઃ સંભૂત ઇતિ વાક્યતઃ ॥ ૬૨॥

અદ્ભ્યઃ સંભૂત ઇત્યેતત્પ્રતીકગ્રહણં કૃતમ્ ।
પ્રદર્શનાર્થં કૃત્સ્નસ્યાનુવાકસ્યેતિ વાક્યતઃ ॥ ૬૩॥

તત્રાનુવાકે પ્રોક્તં હિ ય એવમિતિ વાક્યતઃ ।
મરણેન વિહીનત્વં બ્રહ્મવિજ્ઞાનશાલિનઃ ॥ ૬૪॥

editor: - ય એનં વિદ્વાનમૃત ઇહ ભવતિ - ઇતિ વાક્યેનેત્યર્થઃ ।
હિરણ્યગર્ભ ઇત્યાદ્યા ઋચોઽષ્ટૌ યાઃ સમીરિતાઃ ।
સંહિતાયાં ચતુર્થે હિ કાણ્ડે ત્વાદ્યપ્રપાઠકે ॥ ૬૫॥

આત્મોપલક્ષકત્વેન સૂત્રાદેરભિધાનતઃ ।
તા અપ્યત્રોપયુક્તાઃ સ્યુરિત્યેવમવગમ્યતામ્ ॥ ૬૬॥

editor: પ્રપાઠકે યા ઉક્તાસ્ત અપ્યત્રોપયુક્તાઃ । તત્ર હેતુઃ ,
આત્મેત્યાદિઃ ॥

એષ હિ દેવઃ પ્રદિશોઽનુ સર્વાઃ
પૂર્વો હિ જાતઃ સ ઉ ગર્ભે અન્તઃ ।
સ વિજાયમાનઃ સ જનિષ્યમાણઃ
પ્રત્યઙ્મુખાસ્તિષ્ઠતિ વિશ્વતોમુખઃ ॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતો મુખો
વિશ્વતો હસ્ત ઉત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં નમતિ સં પતત્રૈર્દ્યાવાપૃથિવી

જનયન્ દેવ એકઃ ॥

1.12, 1.13

યથા હિરણ્યગર્ભાદ્યાઃ પરમાત્મોપલક્ષકાઃ ।
તથા જગદ્વિરાટ્ ચૈનમાત્માનમુપલક્ષયેત્ ॥ ૬૭॥

એષ સ્વયંપ્રકાશાત્મા પ્રાચ્યાદ્યાઃ સકલા દિશઃ ।
અનુપ્રવિશ્ય સ્થિતવાન્ પ્રસિદ્ધં હિ પ્રવેશનમ્ ॥ ૬૮॥

હિરણ્યગર્ભરૂપત્વાત્પૂર્વોત્પન્નઃ સ એવ હિ ।
બ્રહ્માણ્ડરૂપગર્ભસ્ય મધ્યેઽસાવેવ વર્તતે ॥ ૬૯॥

પ્રત્યઙ્ઙન્નમયાદિભ્યોઽપ્યાન્તરઃ સ મહેશ્વરઃ ।
મુખા મુખ્યસ્ય દેહાદેરધ્યક્ષત્વેન સોઽચ્યુતઃ ॥ ૭૦॥

રૂપાદિબુધ્દ્વિદ્વારાણિ ચક્ષુરાદીનિ સર્વતઃ ।
યસ્યાસૌ તાદૃશસ્તિષ્ઠત્યધિષ્ઠાનતયાસ્ય ચ ॥

editor: અસ્ય; જગત ઇત્યર્થઃ ।
બ્રહ્માણ્ડદેહવત્ત્વેન સર્વદેહાત્મહત્વતઃ ।
તદક્ષ્યાદિયુતત્વાત્સ વિશ્વતશ્ચક્ષુરાદિનામ્ ॥ ૭૨॥

ધર્માધર્માખ્યબાહુભ્યાં સર્વં સંનમતીશ્વરઃ ।
વશી કરોતિ સર્વં ચ જગદિત્યર્થ ઈરિતઃ ॥ ૭૩॥

પતત્રૈઃ પતયિષ્ણુત્વાન્મહાભૂતૈશ્ચ પઞ્ચભિઃ ।
સર્વં સંનમતીશાનો જગદુત્પાદયત્યયમ્ ॥ ૭૪॥

એવં દેવઃ સ્વપ્રકાશો દ્યાવાભૂમ્યાદિકં પ્રભુઃ ।
ઉત્પાદયઞ્જગત્કૃત્સ્નમેક એવાવતિષ્ઠતે ॥ ૭૫॥

વેનસ્તત્પશ્યન્ વિશ્વા ભુવનાનિ
વિદ્વાન્ યત્ર વિશ્વં ભવત્યેકનીડમ્ ।
યસ્મિન્નિદꣳ સં ચ વિ ચૈકꣳ સ
ઓતઃ પ્રોતશ્ચ વિભુઃ પ્રજાસુ ॥

પ્ર તદ્વોચે અમૃતં નુ વિદ્વાન્
ગન્ધર્વો નામ નિહિતં ગુહાસુ ।
ત્રીણિ પદા નિહિતા ગુહાસુ

યસ્તદ્વેદ સવિતુઃ પિતા સત્ ॥

1.14, 1.15

શ્રદ્ધાપ્રકર્ષમુક્તેઽર્થે કર્તું મન્ત્રદ્વયેન ચ ।
સંદર્શયતિ વૃત્તાન્તં ગન્ધર્વસ્ય શ્રુતિઃ સ્વયમ્ ॥ ૭૬॥

જગત્સમસ્તં યત્રાત્મન્યેકનીડં ભવત્યદઃ ।
એકત્વેન સ્થિતિં ગચ્છત્તદાત્મ્યં પ્રતિપદ્યતે ॥ ૭૭॥

તદ્વસ્ત્વનુભવન્ સાક્ષાત્સર્વાણિ ભુવનાનિ ચ ।
વિદ્વાન્યો વર્તતે જાનન્નત્મત્વેનાખિલં જગત્ ॥ ૭૮॥

આત્મસાક્ષાત્કૃતૌ સર્વં તદ્રૂપમિતિ ભાતિ હિ ।
સ વેનસંજ્ઞો ગન્ધર્વઃ સર્વેષાં બુદ્ધિષુ સ્થિતમ્ ॥ ૭૯॥

અમૃતં નાશરહિતં તદ્વસ્તુ સ્વાનુભૂતિતઃ ।
વિધ્વાન્ પ્રવોચે શિષ્યેભ્યઃ પ્રોવાચ ખલુ સાદરમ્ ॥ ૮૦॥

editor: સ્વાનુભવેન વિદ્વાનિત્યર્થઃ । નુશબ્દાર્થઃ ખલ્વિતિ ।
વેનેન દૃષ્ટે યસ્મિંશ્ચ પરમાત્માનિ વસ્તુનિ ।
ઇદં સર્વં સમુત્પન્નં વિલીનં ચ ભવેજ્જગત્ ॥ ૮૧॥

એકમદ્વયતત્ત્વાત્મા સ વ્યાપી સન્મહેશ્વરઃ ।
દીર્ઘતન્તુવદોતઃ સ્યાત્પ્રજાસુ સકલાસ્વપિ ॥ ૮૨॥

પ્રોતસ્તિર્યક્તન્તવચ્ચ સર્વત્રૈવાવતિષ્ટતે ।
જાગ્રત્સ્વપ્નાદિરૂપાણિ ત્રીણિ સ્થાનાનિ બુદ્ધિષુ ॥ ૮૩॥

સ્થિતાનિ યસ્તુ ગન્ધર્વસ્તદધિષ્ઠાનમીશ્વરમ્ ।
વિજાનાતિ સ ગન્ધર્વો ભવતિ સ્વપિતુઃ પિતા ॥ ૮૪॥

બ્રહ્મજ્ઞો બ્રહ્મરૂપેણ જગદુત્પાદકત્વતઃ ।
ભવત્યુત્પાદકસ્યાપિ સ્વયમુત્પાદકઃ પિતુઃ ॥ ૮૫॥

યસ્તા વિજાનાત્સવિતુઃ પિતા સદિતિ હિ શ્રુતિઃ ।
editor: તદિતિ ; જાગરાદ્યધિષ્ટાનમિત્યર્થઃ ॥

સ નો બન્ધુર્જનિતા સ વિધાતા ધામાનિ વેદ ભુવનાનિ વિશ્વા ।
યત્ર દેવા અમૃતમાનશાનાસ્તૃતીયે ધામાન્યભ્યૈરયન્ત ॥

પરિ દ્યાવાપૃથિવી યન્તિ સદ્યઃ પરિ લોકાન્

પરિ દિશઃ પરિ સુવઃ ।
ઋતસ્ય તન્તું વિતતં વિચૃત્ય
તદપશ્યત્ તદભવત્પ્રજાસુ ॥

1.16, 1.17
વ્યવહારદશાયાં ચ સર્વપ્રાણ્યુપકારિતા ॥ ૮૬ ॥

તદ્દર્શિમુક્તિદત્વં ચ મન્ત્રાભ્યાં તસ્ય કથ્યતે ।
સ નો બન્ધુઃ સ્વપુણ્યેન હિતકૃત્તવાન્મહેશ્વરઃ ॥ ૮૭ ॥

જનિતા સર્વહેતુત્વાત્ સ નિર્માતાખિલસ્ય સન્ ।
સર્વાનુચ્ચાવચાઁલ્લોકાંસ્તેષુ સ્થાનાનિ યાનિ ચ ॥ ૮૮ ॥

યોગ્યાનિ દેવતાદીનાંતાનિ જાતાનિ સર્વદૃક્ ।
યત્ર તૃતીયે સ્વર્ગાખ્યે દેવા ઇન્દ્રાદયોઽમૃતમ્ ॥ ૮૯ ॥

પિબન્તઃ પ્રાપ્તવન્તશ્ચ સ્વીયસ્થાનાનિ સર્વતઃ ।
તત્સમસ્તં વિદિત્વાયં તત્તત્કર્માનુસારતઃ ॥ ૯૦ ॥

ફલં પ્રયચ્છતીત્યર્થો મન્ત્રસ્યાસ્ય પ્રકીર્તિતઃ ।
યે સ્યુર્મુમુક્ષવસ્તે તુ બ્રહ્મતત્ત્વાર્થવેદિનઃ ॥ ૯૧ ॥

દ્યાવાભૂમીદ્વયં સદ્યઃ પરિતો વ્યાપ્નુવન્તિ ચ ।
અન્તરિક્ષાદિકાઁલ્લોકાન્પ્રાચ્યાદ્યાઃ સકલા દિશઃ ॥ ૯૨ ॥

સ્વર્ગલોકં ચ પરિતો યન્તિ સર્વાત્મકત્વતઃ ।
સત્યસ્ય બ્રહ્મણસ્તન્તુમવિચ્છેદેન સંસ્થિતમ્ ॥ ૯૩ ॥

વિસ્થીર્ણં સ્યાદ્યથા શાસ્ત્રાન્નિશ્ચિત્ય ગુરુતશ્ચ તત્ ।
યઃ સાક્ષાત્કૃતવાન્ બ્રહ્મ સ પ્રજાસ્વભવચ્ચ તત્ ॥ ૯૪ ॥

શ્રુત્યન્તરં બ્રહ્મ વેદ બ્રહ્મએવ ભવતીતિ હિ ।
પરીત્ય લોકાન્ પરીત્ય ભૂતાનિ
પરીત્ય સર્વાઃ પ્રદિશો દિશશ્ચ ।
પ્રજાપતિઃ પ્રથમજા ઋતસ્યાત્મનાત્માનમભિસંબભૂવ ॥

1.18
અમ્ભસ્યેત્યાદિના પ્રોક્તા બ્રહ્મવિદ્યા નિગમ્યતે ॥ ૯૫ ॥

સત્યસ્ય બ્રહ્મણો હ્યાદ્યકાર્યરૂપં પ્રજાપતિઃ ।

હિરણ્યગર્ભો ભૂરાદીન્ લોકાન્દેવનરાદિકાન્ ॥ ૯૬॥

દેહાન્પરીત્ય વિદિશઃ પ્રાચ્યાદિકદિશોઽપિ ચ ।
સર્વતો વ્યાપ્ય સમયે સૃષ્ટેઃ સૃષ્ટ્વાખિલં જગત્ ॥ ૯૭॥

સ્થિતિકાલે ચ રક્ષિત્વા સત્યાદ્યાત્માનમાપ્તવાન્ ।
આત્મના સ્વસ્વરૂપેણ તદ્ગોચરવિબોધતઃ ॥ ૯૮॥

સદસસ્પતિમદ્ભુતં પ્રિયમિન્દ્રસ્ય કામ્યમ્ ।
સનિં મેધામયાસિષમ્ ॥

1.19
પ્રાર્થ્યતે બ્રહ્મલાભાર્થમન્તર્યામી મહેશ્વરઃ ।
સીદત્યસ્મિઞ્જગત્સર્વમિત્યવ્યાકૃતમુચ્યતે ॥ ૯૯॥

સદઃશબ્દેન તસ્યાયં પતિઃ પાલયિતા સ્મૃતઃ ।
અન્તર્યામી તમીશાનં પ્રાપ્તવાનસ્મ્યયાસિષમ્ ॥ ૧૦૦॥

શીઘ્રં સમ્પ્રાપ્નવાનીતિ મત્વા ભૂતાર્થકીર્તતમ્ ।
possibly kIrtitam?
editor: ઇતિ મત્વા ; ઇતિ વિવક્ષયેત્યર્થઃ ।
અચિન્ત્યચિત્રજગતોઽનાયાસેન કૃતત્વતઃ ॥ ૧૦૧॥

આશ્ચર્યરૂપમિન્દ્રસ્ય દેવરાજસ્ય ચ પ્રિયમ્ ।
કદા લપ્સ્યેઽહમિત્યેવમિન્દ્રોઽપ્યાશાસ્તિ હીશ્વરમ્ ॥ ૧૦૨॥

સર્વૈરન્યૈરપેક્ષ્યં ચ સનિં કર્મફલાત્મકમ્ ।
ક્રિયાફલપ્રદાતારં શ્રુતાધીતસ્ય ધારણે ॥ ૧૦૩॥

શક્તિં મેધાં પ્રયચ્છન્તમિત્યધ્યાહૃતિરિષ્યતે ।
ઉદ્દીપ્યસ્વ જાતવેદોઽપઘ્નન્નિરૃતિં મમ ।
પશૂꣳશ્ચ મહ્યમમાવહ જીવનં ચ દિશો દિશ ॥

1.20
વહ્ન્યુપાધિર્મહેશાનઃ પ્રાર્થ્યતેઽભીષ્ટલબ્ધયે ॥ ૧૦૪॥

જાતે પ્રાણિશરીરે યો જાઠરાગ્નિસ્વરૂપતઃ ।
વિદ્યતે તિષ્ઠતીત્યેવં જાતવેદાઃ સ ઉચ્યતે ॥ ૧૦૫॥

ઉત્પન્નાન્યજમાનાન્વા ફલદાનાય ચેતસિ ।

વિનિશ્ચિનોતિ વેત્તીતિ જાતવેદાઃ પ્રકીર્તિતઃ ॥ ૧૦૬॥

જાતવેદઃ પ્રકર્ષેણ દીપ્યસ્વાનુગ્રહાય મે ।
મમાનિષ્ટં પ્રકુર્વાણાં નિરૃતિં પાપદેવતામ્ ॥ ૧૦૭॥

વિનાશયન્વિનાશ્યૈતાં પશૂન્મહ્યં ગવાદિકાન્ ।
જીવનં ચ ચકારભ્યાં ભોગ્યજાતમશેષતઃ ॥ ૧૦૮॥

સમ્પાદય નિવાસાર્થં દિશઃ પ્રાચ્યાદિદિગ્ગતાન્ ।
નિવાસાન્ દિશ દેહીતિ મન્ત્રાર્થઃ પરિકીર્તિતઃ ॥ ૧૦૯॥

મા નો હિꣳ સીજ્જાતવેદો ગામશ્વં પુરુષં જગત્ ।
અબિભ્રદગ્ન આગહિ શ્રિયા મા પરિપાતય ॥

1.21

સમ્પાદિતગવાદીનાં પ્રાર્થ્યતેઽત્રાવિનાશનમ્ ।
હે જાતવેદો ગામશ્વં ત્વત્પ્રસાદાગ્દવાદિકમ્ ॥ ૧૧૦॥

મામકીનં ચ મા હિંસીન્મા નાશયતુ નિરૃતિઃ ।
જગચ્છબ્દાગ્દવાધન્યગૃહક્ષેત્રાદિકીર્તિતમ્ ॥ ૧૧૧॥

અગ્નેઽસ્મદપરાધં ત્વં મનસ્યસ્થાપયન્પ્રભો ।
આગચ્છાનુગ્રહર્થં મે શ્રિયા મા પરિપાતય ॥ ૧૧૨॥

ધનધાન્યસમૃદ્ધ્યા માં સર્વતઃ પ્રાપયેશ્વર ।
પુરુષસ્ય વિદ્મહે સહસ્રાક્ષસ્ય મહાદેવસ્ય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥

1.22

ઇતઃ પરં તેષુ તેષુ દેશેષ્વતિવિલક્ષણઃ ॥ ૧૧૩॥

શ્રીતિપાઠસ્તત્ર પૂર્વૈર્દ્રાવિડઃ પાઠ આદૃતઃ ।
તસ્માત્તદનુસારેણ શ્રુતિવ્યાખ્યાધુનોચ્યતે ॥ ૧૧૪॥

જાયત્રીષટ્કતો દેવાઃ પ્રાર્થ્યન્તે જ્ઞાનહેતવઃ ।
વિશ્વરૂપધરો રુદ્ર?ઃ પ્રાર્થ્યતે તત્ર ચાદિતઃ ॥ ૧૧૫॥

વિશ્વતશ્ચક્ષુરિત્યુક્તઃ સહસ્રાક્ષો વિરાટ્ પુમાન્ ।
તસ્ય સ્વરૂપં દેવસ્ય જાનીમહિ લભેમહિ ॥ ૧૧૬॥

તદર્થં તસ્ય દેવસ્ય રૂપં ધ્યાયેમ ધીમહિ ।

તસ્મિન્ ધ્યાને વિરાડ્ રુદ્રો નોઽસ્મન્ પ્રેરયતુ પ્રભુઃ ॥ ૧૧૭॥

editor: - બિભ્રદ્દોર્ભિઃ કુઠારં સૃગમભયવરૌ સુપ્રસન્નો
મહેશઃ -
ઇત્યાદ્યાગમપ્રસિદ્ધમૂર્તિધરં મહેશં પ્રાર્તયતે—
તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો રુદ્રઃ પ્રચોદયાત્
1.23
તમાગમેષુ પ્રથિતં પુરુષાકૃતિમીશ્વરમ્ ।
જાનીમહિ મહાદેવં ધ્યાયેમ સતતં વયમ્ ॥ ૧૧૮॥

પ્રચોદયતુ નો રુદ્રસ્તસ્મિન્ ધ્યાને નિરન્તરમ્ ।
editor: - બીજાપૂરગદેક્ષુકાર્મુક—
ઇત્યાદ્યાગમપ્રસિદ્ધમૂર્તિધરં
વિનાયકં પ્રાર્થયતે
તત્પુરુષાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ ।
તન્નો દન્તિઃ પ્રચોદયાત્
1.24
જગતુલ્યમુખત્વેન દીર્ઘતુણ્ડસ્ય વક્રતા ॥ ૧૧૯॥

યો રત્નકલશસ્તસ્ય ધારણાયેતિ મન્યતામ્ ।
દન્તિર્મહાદન્તયુક્ત ઇત્યર્થઃ પરિકીર્તિતઃ ॥ ૧૨૦॥

editor: પુરાણાદિપ્રસિદ્ધં પક્ષિરાજમૂર્તિધરં દેવં પ્રાર્થયતે—
તત્પુરુષાય વિદ્મહે સુવર્ણપક્ષાય ધીમહિ ।
તન્નો ગરુડઃ પ્રચોદયાત્ ॥

editor: સ્પષ્ટાર્થત્વેન મન્ત્રસ્ય ન વ્યાખ્યા વાર્ત્તિકાત્મિકા ।
- હેમપ્રખ્યામિન્દુખણ્ડાત્તમૌલિમ્ -
(પ્રપઞ્ચસારઃ ૧૪-૨૩)
ઇત્યાદ્યાગમપ્રસિદ્ધમૂર્તિધરાં દુર્ગાં પ્રાર્થયતે—
કાત્યાયનાય વિદ્મહે કન્યાકુમારિ ધીમહિ ।
તન્નો દુર્ગિઃ પ્રચોદયાત્ ॥

1.33
કાત્યઃ કૃત્તિં વસ્ત ઇતિ શ્રીરુદ્રઃ પરિકીર્તિતઃ ॥ ૧૨૧॥

સ એવ યસ્યા અયનમધિષ્ઠાનં તથોચ્યતે ।
કુમારી કુત્સિતારિષ્ટમારિકા પરિકીર્તિતા ॥ ૧૨૨॥

કન્યા ચ કમનીયાસૌ કુમારી ચ તથોદિતા ।
દુર્ગિર્દુર્ગૈવ લિઙ્ગાદેર્વ્યત્યયશ્છાન્દસો ભવેત્ ॥ ૧૨૩॥

- અકોર્દ્દીપ્યત્કિરીટાન્વિતમકરલસત્કુણ્ડકમ્-
ઇત્યાદ્યાગમપ્રસિદ્ધમૂર્તિધરં
દેવં પ્રાર્થયતે—
નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નો વિષ્ણુઃ પ્રચોદયાત્
1.29!
નાર્શબ્દિતમુખ્યાપો યસ્ય વિષ્ણોઃ સમાશ્રયઃ ।
સમુદ્રજલસંવાસી સ નારાયણ ઉચ્યતે ॥ ૧૨૪॥

વસુદેવાદભિવ્યક્તઃ સોઽવતરવિશેષતઃ ।
પરમબ્રહ્મરૂપેણ વ્યાપિત્વાદ્વિષ્ણુરુચ્યતે ॥ ૧૨૫॥

જપ્યા એતાશ્ચ ગાયત્ર્યો દેવતાધ્યાનપૂર્વકમ્ ।
અન્તઃકરણશુદ્ધ્યર્થં સદા સૂરિભિરાદરાત્ ॥ ૧૨૬॥

footnote ઇતઃ પરં સહસ્રપરમા દેવી
ઇત્યારભ્ય પઞ્ચમાનુવાકપર્યન્તં ગ્રન્થકૃતા ન વિવૃતમ્ ।
ઇતિ પ્રથમોઽનુવાકઃ
યશ્છન્દસામૃષભો
વિશ્વરૂપશ્છન્દોભ્યશ્ચન્દા ँ સ્યાવિવેશ ।
સતા ँ શિક્યઃ પ્રોવાચોપનિષદિન્દ્રો જ્યેષ્ઠ ઇન્દ્રિયાય
ઋષિભ્યો નમો
દેવેભ્યઃ સ્વધા પિતૃભ્યો ભૂર્ભુવઃ સુવરોમ્ ॥

8.1
i.v. says ભૂર્ભુવસ્સુવશ્છન્દ ઓમ્ at the end
સર્વવેદાન્તલાભાય જપ્યો મન્ત્ર ઉદીર્યતે ।
વેદાનાં પ્રણવઃ શ્રેષ્ઠો યઃ સર્વજગદાત્મકઃ ॥ ૧૨૭॥

પ્રાદુર્ભૂતઃ સ વેદેભ્યઃ પ્રતિભાતઃ પ્રજાપતેઃ ।
વેદસારતયેત્યર્થઃ પ્રવિવેશઃ પુનશ્ચ સઃ ॥ ૧૨૮॥

ગાયત્ર્યાદીનિ મન્ત્રેષુ પ્રયોજ્યસ્તદ્યુતેષુ હિ ।
મન્ત્રેષ્વિતિ ; છન્દોભિરુપલક્ષિતેષુ પ્રયોક્તવ્યઃ ।
તદુક્તં પ્રપઞ્ચસારે—
- અસ્ય તુ વેદાદિત્વાત્ સર્વમનૂનાં પ્રયુજ્યતે હ્યાદૌ
- (૧૯-૩૫) ઇતિ ॥

સતાં શિક્યઃ કર્મભિશ્ચોપાસકૈર્જ્ઞાનશાલિભિઃ ॥ ૧૨૯॥

પ્રાપ્તં શક્યઃ કારણત્વાજ્જ્યેષ્ઠઃ પ્રથમ ઉચ્યતે ।
ઇન્દ્રઃ પ્રણવવાચ્યાત્મા પરમૈશ્વર્યસંયુતઃ ॥ ૧૩૦॥

ઋસયોઽન્તર્મુખાસ્તેષાં જ્ઞાનસામર્થ્યસિદ્ધયે ।
બ્રહ્મવિદ્યાં જગૌ તસ્માત્પ્રતિબન્ધનિવૃત્તયે ॥ ૧૩૧॥

મનસ્કરોમિ દેવેભ્યઃ પિતૃભ્યશ્ચાહમાદરાત્ ।
ભૂર્ભુવઃ સુવરોંવેદાંસ્ત્રિલોકસ્થાનવાપ્નુયામ્ ॥ ૧૩૨॥

અત એવ પઠન્ત્યન્યે છન્દ ઓમિતિ માનવાઃ ।
editor: ભૂર્ભુવઃ સુવશ્છન્દ ઓમિત્યર્થઃ ॥

ઇતિ ષષ્ઠોઽનુવાકઃ
book doesn’t mention 2-5
નમો બ્રહ્મણે ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં
કર્ણયોઃ શ્રુતં મા ચ્યોઢ્વં મમામુષ્ય ઓમ્ ॥

9.1
i.v. says -ચ્યોઢં-
અવાપ્તવેદાવિસ્મૃત્યૈ જપ્યમન્ત્ર ઉદીર્યતે ॥ ૧૩૩॥

મનોઽસ્તુ સર્વજગતાં હેતવે પરમાત્મને ।
ગ્રન્થસ્ય ચ તદર્થસ્ય ધારણં મેઽસ્તુ ચેતસિ ॥ ૧૩૪॥

અનિરાકરણં નામાવિસ્મૃતિઃ સા યથા ભવેત્ ।
તથા ધારયિતાહં સ્યાં પરમેષ્ઠિપ્રસાદતઃ ॥ ૧૩૫॥

એવં પ્રાર્થયમાનસ્ય કર્ણયોર્યચ્છ્રુતં મમ ।
અવિનાશાય તત્સર્વં પ્રાપ્નુયાં સ્થિરધારણમ્ ॥ ૧૩૬॥

ઇતિ સપ્તમોऽનુવાકઃ
ઋતં તપઃ સત્યં તપઃ શ્રુતં તપઃ શાન્તં તપો દાનં તપો
યજ્ઞ।સ્તપો ભૂર્ભુવઃ
સુવર્બ્રહ્મૈતદુપાસ્સ્વૈતત્તપઃ
॥

10
i.v. quotes -ઋતમ્ ॥। શાન્તં તપો દમસ્તપઃ
શમસ્તપો દાનં તપો યજ્ઞં તપો ભૂર્ભુવઃ ॥।-
ઐકાગ્ર્યુલક્ષણં યત્સ્યાત્તપો વિજ્ઞાનસાધનમ્ ।
તત્તપઃપ્રાપ્તયે જપ્યો મન્ત્રોऽયમધુનોચ્યતે ॥ ૧૩૭॥

ઋતં વેદાર્થબોધાય મીમાંસાશ્રવણં મતમ્ ।
editor: મીમાંસયોઃ શ્રવણમિત્યર્થઃ ।
ઇન્દ્રિયોપરતિઃ શાન્તિઃ શાન્તિશબ્દેન કીર્ત્યતે ॥ ૧૩૮॥

સ્વસ્વત્યાગઃ પરસ્વત્વાપત્ત્યન્તો દાનમુચ્યતે ।
editor: આપત્તીતિ ; આપાદનપર્યન્ત ઇત્યર્થઃ ।
અગ્નિહોત્રાદિકો યજ્ઞસ્તત્સર્વં તપ ઉચ્યતે ॥ ૧૩૯॥

વિરાટ્સ્વરૂપંયદ્બ્રહ્મ ભૂરાદિત્રિતયાત્મકમ્ ।
મુમુક્ષો ત્વમુપાસ્સ્વૈતત્પ્રત્યાયવર્તતં કુરુ ॥ ૧૪૦॥

એતચ્ચોપાસનં પ્રોક્તમુત્તમં તપ ઉચ્યતે ।
ઇત્યષ્ટમોऽનુવાકઃ
યથા વૃક્ષસ્ય સમ્પુષ્પિતસ્ય દૂરાદ્ગન્ધો વાત્યેવં પુણ્યસ્ય
કર્મણો દૂરાદ્ગન્ધો વાતિ યથાસિધારાં કર્તેऽવહિતમવક્રામે
યદ્યુવે યુવે હવા વિહ્વયિષ્યામિ કર્તં
પતિષ્યામીત્યેવમમૃતાદાત્માનં
જુગુપ્સેત્ ।
11
જ્ઞાનહેતુતયા પુણ્યં વિહિતાચરણાત્મકમ્ ॥ ૧૪૧॥

પ્રશસ્યતે નિષિદ્ધસ્યાચરણં ચ વિનિન્ધ્યતે ।
editor: જ્ઞાનપ્રતિબન્ધકત્વેનેતિ શેષઃ ।
યથૈવ સુરભિર્ગન્ધઃ સહાગચ્છતિ વાયુના ॥ ૧૪૨॥

એવં પુણ્યસ્ય યાગદેઃ સુગન્ધઃ કીર્તિલક્ષણઃ ।
દૂરાદ્ભાતિ નૃલોકાદ્ધિ સ્વર્ગે ગચ્છત્યતો નૃભિઃ ॥ ૧૪૩॥

પુણ્યં કાર્યમથાગ્રે તુ પાપદૃષ્ટાન્ત ઉચ્યતે ।
યથા પ્રસારિતાં ગર્તે કૂપાદૌ કુત્રચિન્નરઃ ॥ ૧૪૪॥

ખડ્ગધારામવક્રામેત્તદાયં ચિન્તયેન્નરઃ ।
યુવે હુવે યૌમિ યૌમિ યદ્યઙ્ઘ્રિં મિશ્રયામ્યહમ્ ॥ ૧૪૫॥

તદ્ધારાયાં તદાહં તુ
footnote  મૂલે લસ્ય છાન્દસો દકાર ઇતિ સાયણઃ ।
વિહ્વલિષ્યામ્યસંશયમ્ ।
ગર્તં વા સમ્પતિષ્યામિ ધારાયાં ચરણસ્ય હિ ॥ ૧૪૬॥

દૃઢસ્પર્શેન વિચ્છેદાદ્ભાવિષ્યામ્યેવ વિહ્વલઃ ।
દૃઢસ્પર્શો ન ચેદ્ગર્તે સમ્પતિષ્યામ્યધસ્ત્વિતિ ॥ ૧૪૭॥

એવં પ્રવર્તમાનોઽપિ પાપે મર્ત્યો વિચારયેત્ ।
યદિ તત્પ્રકટં કુર્યાં તદા સ્યામહિ નિન્દિતઃ ॥ ૧૪૮॥

યદિ ચાપ્રકટં કુર્યાં તદાપિ નરકે ખલુ ।
પતિષ્યામીતિ ચાત્માનં જુગુપ્સેદનૃતાન્નરઃ ॥ ૧૪૯॥

ધિઙ્ માં લોકદ્વયભ્રષ્ટમિત્યાત્માનં વિનિન્દ્ય ચ ।
પાપાન્નિવારયેન્મર્ત્ય ઇતિ મન્ત્રાર્થ ઈરિતઃ ॥ ૧૫૦॥

editor: અવક્રામેત્ ; તદુપરિ પદાભ્યાં ગન્તું પ્રવર્તત ઇત્યર્થઃ ।
યચ્છબ્દો યદિશબ્દાર્થે યસ્થાને વ્યત્યયેન હઃ ।
અત એવ પઠન્ત્યન્યે યુવે યુવે ઇતિ શ્રુતૌ ॥ ૧૫૧॥

અહમર્થે હશબ્દઃ સ્યાલ્લસ્થાને વ્યત્યયેન દઃ ।
editor: યદ્યુવ ઇત્યાદાવાહ—યચ્છબ્દ ઇત્યાદિના । અધ ઇતિ ;
અધોવર્તિનિ
ગર્તે ત્વિત્યન્વયઃ । ઇતીતિ ; -ઇતિ ચિન્તયેન્નરઃ - ઇતિ
પૂર્વેણાન્વયઃ । ઇતિ
ચાત્માનમિતિ ; ઈદૃગ્વિચારયુક્ત ઇત્યર્થઃ ।
ઇતિ નવમોઽનુવાકઃ
અણોરણીયાન્મહતો મહીયાનાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।

તમક્રતું પશ્યતિ વીતશોકો ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥

12.1

પુણ્યાનુષ્ઠાનતશ્ચાસ્ય નિષિદ્ધાચારવર્જનાત્ ॥ ૧૫૨॥

શુદ્ધાન્તઃકાર્ણસ્યૈવં બ્રહ્મતત્ત્વં સમીરિતુમ્ ।
અણોરણીયાનિત્યાદિરનુવાકઃ પ્રવર્તતે ॥ ૧૫૩॥

આત્મશબ્દઃ સ્વરૂપાર્થઃ પરમેશ્વરવાચકઃ ।
અધિષ્ઠાનતયા તસ્ય જગદ્રૂપત્વકારણાત્ ॥ ૧૫૪॥

પરમાણ્વાદયોઽસ્માકમયોગ્યાઃ સ્યુસ્તથાપિ ચ ।
યોગિપ્રત્યક્ષગમ્યત્વં તેષાં તચ્ચાત્મનો ન હિ ॥ ૧૫૫॥

ઇત્યભિપ્રેત્ય ભગવાનણીયાન્પરિકીર્તિતઃ ।
એકબ્રહ્માણ્ડમધ્યસ્થં દિગાકાશાદિકં મહત્ ॥ ૧૫૬॥

ઈદૃગ્બ્રહ્માણ્ડકોટીનામધિષ્ઠાનત્વમાત્મનઃ ।
અતો મહીયાન્મહતોઽપ્યયમાત્મા પ્રકીર્તિતઃ ॥ ૧૫૭॥

હૃદબ્જસંવૃતા બુદ્ધિસ્તન્મધ્યસ્થા ગુહોચ્યતે ।
સ્યાદ્વિધયોપલભ્યત્વં બુદ્ધૌ નિહિતમાત્મનઃ ॥ ૧૫૮॥

તમીશં નિરુપાધિત્વાત્સંકલ્પેન વિવર્જિતમ્ ।
જીવસ્યૈવ સમીચીનમિત્યેતત્કલ્પનં યતઃ ॥ ૧૫૯॥

અત એવ મહાન્તં ચ શમાદિગુણસંયુતઃ ।
ધાતુઃ પ્રસાદાદીશસ્યાનુગ્રહાદધિકારવાન્ ॥ ૧૬૦॥

સાક્ષાત્કરોતિ દૃષ્ટ્વા તં વીતશોકો ભવેન્નરઃ ।
editor: ધાતુરિતિ । તદુક્તમ્—
-ઈશ્વરાનુગ્રહાદેષાં પુંસામદ્વૈતવાસના ।
મહાભયપરિત્રાણા દ્વિત્રાણામિહ જાયતે ॥-
ઇતિ ।
સપ્ત પ્રાણા પ્રભવન્તિ તસ્માત્
સપ્તાર્ચિષઃ સમિધઃ સપ્ત જિહ્વાઃ ।
સપ્ત ઇમે લોકા યેષુ ચરન્તિ
પ્રાણા ગુહાશયાન્નિહિતાઃ સપ્ત સપ્ત ॥

12.2

વિશુદ્ધચિત્તૈર્વિજ્ઞેયઃ પરમાત્મા ચ ઈરિતઃ ॥ ૧૬૧॥

તસ્યોપલક્ષનાર્થં ચ જગત્કારણતોચ્યતે ।
editor: તસ્યેતિ ; શાખેન્દુન્યાયેનેત્યર્થઃ ।
શિરઃસ્થસપ્તચ્છિદ્રસ્થાઃ સપ્તસંખ્યાસમન્વિતાઃ ॥ ૧૬૨॥

પ્રાણા માયાયુતાદીશાજ્જાયન્તે ચક્ષુરાદયઃ ।
ચક્ષુષી નાસિકે શ્રોત્રે વાક્ ચેતિ પ્રાણસપ્તકમ્ ॥ ૧૬૩॥

સપ્તાર્ચિષા સપ્તસંખ્યા વૃત્તયઃ પરિકીર્તિતા ।
તૈર્ગૃહ્યમાણવિષયાઃ સમિધઃ સપ્ત કીર્તિતા ॥ ૧૬૪॥

યથા ગોલકભેદેન ચક્ષુરાદિ દ્વિધા ભવેત્ ।
તથા ગ્રાહકભેદેન રૂપાદિદ્વિત્વમુચ્યતે ॥ ૧૬૫॥

editor: તૈઃ ; અર્ચિર્ભિરિત્યર્થઃ ।
અથવા સપ્તસંખ્યાયાઃ સમિચ્છબ્દેન નાન્વયઃ ।
કિંતુ જિહ્વાપદેનૈવ વહ્નેર્જિહ્વાસ્ત્વિમાઃ શ્રુતાઃ ॥ ૧૬૬॥

- કાલી કરાલી ચ મનોજવા ચ
 સુલોહિતા યા ચ સુધૂમ્રવર્ણા ।
 સ્ફુલિઙ્ગિની વિશ્વરૂચી ચ દેવી
 લોલાયમાના ઇતિ સપ્ત જિહ્વાઃ ॥ -
 સુ। ૧-૪
editor: મુણ્ડકશ્રુતિમેવ પઠતિ—કાલીતિ ।
પ્રાણાશ્ચરન્તિ દેવાદેર્દેહસ્થા યેષુ સપ્તસુ ।
ઇમે ભૂરાદયઃ સપ્ત લૂકાસ્તસ્માત્સમુત્થિતાઃ ॥ ૧૬૭॥

ગુહાશયઃ સ વિજ્ઞેયો યો બુદ્ધાવુપલભ્યતે ।
તસ્માદેવ સમુત્પન્નાઃ સપ્તસંખ્યાસમન્વિતાઃ ॥ ૧૬૮॥

સપ્તર્ષયસ્તથા સપ્ત સમુદ્રા એવમાદિકાઃ ।
પદાર્થા નિહિતાસ્તત્ર તત્ર ચ સ્થાપિતાઃ સ્થલે ॥ ૧૬૯॥

અતઃ સમુદ્રા ગિરયશ્ચ સર્વેઽસ્માત્સ્યન્દન્તે
સિન્ધવઃ સર્વરૂપાઃ ।
અતશ્ચ વિશ્વા ઓષધયો રસાશ્ચ

યેનૈષ ભૂતસ્તિષ્ઠત્યન્તરાત્મા ॥

12.3

સમુદ્રા ગિરયશ્ચાસ્માત્પ્રભવન્તિ મહેશ્વરાત્ ।
અસ્માદ્ગઙ્ગાદયો નદ્યઃ સંજાતાઃ પ્રવહન્તિ ચ ॥ ૧૭૦॥

બ્રીહ્યાદ્યોષધયોઽમ્લાદ્યા રસાશ્ચેશાત્સમુત્થિતાઃ ।
અન્તરાત્માપદેનાત્ર લિઙ્ગદેહો વિવક્ષિતઃ ॥ ૧૭૧॥

સ્થૂલદેહચિદાત્માન્તર્મધ્યે હ્યેષોઽવતિષ્ઠતે ।
યેનૌષધિરસેનાયં બદ્ધે દેહેઽત્ર તિષ્ઠતિ ॥ ૧૭૨॥

તાદૃશો રસ ઉત્પન્ન ઇત્યર્થઃ પરિકીર્તિતઃ ।
બ્રહ્મા દેવાનાં પદવીઃ કવીના-
મૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનો ગૃધ્રાણાꣳ સ્વધિતિર્વનાનાꣳ
સોમઃ પવિત્રમત્યેતિ રેભન્ ॥

12.4

ઈશસ્યોત્કૃષ્ટરૂપેણાવસ્થાનમિહ કથ્યતે ॥ ૧૭૩॥

ઇન્દ્રાદિકાનાં દેવાનાં મધ્યે બ્રહ્મા ચતુર્મુખઃ ।
ભૂત્વા નિયામકત્વેન પરમેશોઽવતિષ્ઠતે ॥ ૧૭૪॥

કવીનાં કાવ્યશાસ્ત્રાદેઃ કર્તૃણાં પદવીરયમ્ ।
પદં સુશબ્દં વેતીતિ શબ્દસામર્થ્યબોધવાન્ ॥ ૧૭૫॥

વ્યાસવાલ્મીકિમુખ્યો યસ્તદ્રૂપશ્ચાવતિષ્ઠતે ।
ઋષિર્વસિષ્ઠપ્રમુખસ્તત્તદ્ગોત્રપ્રવર્તકઃ ॥ ૧૭૬॥

ચતુષ્પાદાં તુ મહિષઃ શક્ત્યાધિક્યેન સંયુતઃ ।
બભૂવ પ્રબલઃ શ્યેનઃ સર્વેષાં પક્ષિણામપિ ॥ ૧૭૭॥

વૃક્ષૌઘાનાં છેદનાર્થં પરશુશ્ચ બભૂવ સઃ ।
સોમવલ્લ્યાત્મકો રેભન્પવિત્રં શુદ્ધિકારણમ્ ॥ ૧૭૮॥

મન્ત્રશબ્દેન યુક્તઃ સન્નત્યેત્યખિલમેવ સઃ ।
અજામેકાં લોહિતશુક્લકૃષ્ણાં
બહ્વીં પ્રજાં જનયન્તીꣳ

સરૂપામ્ ।
અજો હ્યેકો જુષમાણોઽનુશેતે
જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ ॥

12.5
ચતુર્મુખાદિદેહેષુ વિશેષેણ સ્થિતિં વિભોઃ ॥ ૧૭૯ ॥

વ્યવહારસ્ય સમયે સંકીર્ત્યાથ પ્રદર્શ્યતે ।
અવિદ્યામુપજીવ્યાત્ર બદ્ધમુક્તવ્યવસ્થિતિઃ ॥ ૧૮૦ ॥

તેજોઽબન્નાનિ સમ્પાદ્ય તદ્રૂપાજ યદા તદા ।
લોહિતાદિકવર્ણા સ્યાદ્યદગ્નેરિતિ હિ શ્રુતિઃ ॥ ૧૮૧ ॥

editor: તેજ ઇતિ ; અજા તેજાદીનિ સમ્પાદ્ય તદ્રૂપા યદા
સ્યાત્તદેત્યન્વયઃ ।
-યદગ્ને રોહિતં રૂપં તેજસસ્તદ્રૂપં યચ્છુક્લં તદપાં
યત્કૃષ્ણં તદન્નસ્ય-
(છાન્દોગ્યે ૬-૪-૧ । ) ઇતિ શ્રુતેરિત્યર્થઃ ।
લોહિતાદિકશબ્દૈર્વા રજઃસત્ત્વમોગુણાઃ ।
ઉપલક્ષ્યાસ્તથા ચેયં સ્યાદ્ગુણત્રિતયાત્મિકા ॥ ૧૮૨ ॥

ગુણત્રયાત્મકત્વેન સરૂપા યા પ્રજા ભવેત્ ।
તાં સમુત્પાદયત્યેકા તામજો જનિવર્જિતઃ ॥ ૧૮૩ ॥

જીવઃ સક્તો વિરક્તશ્ચ તત્રૈકઃ સક્તિમાનજઃ ।
પ્રીત્યા સંસેવમાનઃ સન્નનુશેતે વિમૂઢધીઃ ॥ ૧૮૪ ॥

યથોક્તામનુસૃત્યૈવ વર્તતે યાતિ સંસૃતિમ્ ।
અન્યો વિરક્તજીવસ્તુ ભુક્તભોગાં જહાતિ તામ્ ॥ ૧૮૫ ॥

પ્રાગેવ ભુક્તા ભોગા યે નોપરિષ્ટાત્તથાવિધૈઃ ।
ભોગૈર્યુક્તાં ભુક્તભોગાં તત્ત્વજ્ઞાનેન બાધતે ॥ ૧૮૬ ॥

સંધાતમાની બદ્ધઃ સ્યાત્તદ્વિહીનો વિમુચ્યતે ।
editor: વ્યવસ્થાં વ્યક્તીકરોતિ—સંધાતેતિ ।
હ૱ સઃ શુચિષદ્વસુરન્તરિક્ષસ-
દ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા

ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥

12.6

internet version has ha.nsaH

જ્ઞાનબાધિતમાયસ્ય ભાતિ બ્રમાત્મના જગત્ ॥ ૧૮૭॥

ઇતિ પ્રદર્શ્યતેઽર્થોઽયમતો જગદનૂદ્યતે ।
સર્વદા ગચ્છતીત્યર્કો હંસોઽયં શુદ્ધમણ્ડલે ॥ ૧૮૮॥

જ્યોતિર્મયે સીદતીતિ શુચિષત્પરિકીર્તિતઃ ।
જગન્નિવાસહેતુત્વાદ્વસુઃ સૂત્રાત્મરૂપતઃ ॥ ૧૮૯॥

વાયુઃ સન્નન્તરિક્ષેઽયં સીદતીત્યન્તરિક્ષસત્ ।
હોતાગ્નિર્હોમજનકસ્તદ્રૂપો વેદિસંસ્થિતઃ ॥ ૧૯૦॥

સીદત્યતિથિરૂપેણ દુરોનેષુ ગૃહેષ્વયમ્ ।
કર્માધિકારિજીવઃ સન્ નૃષુ મર્ત્યેષુ સંસ્થિતઃ ॥ ૧૯૧॥

વરસચ્છ્રેષ્ઠકાશ્યાદૌ પૂજ્યદેવાત્મના સ્થિતઃ ।
ઋતસ્તત્ફલરૂપેણ વૈદિકે કર્મણિ સ્થિતઃ ॥ ૧૯૨॥

નક્ષત્રાદિકરૂપેણ વ્યોમસ્થો વ્યોમસદ્ભવેત્ ।
અદ્ભ્યો જલેભ્યઃ સંજાતઃ શઙ્ખનક્રાદિરૂપતઃ ॥ ૧૯૩॥

ગોજાઃ ક્ષીરાદિરૂપેણ ગોભ્યઃ સંજાત ઉચ્યતે ।
ઋતજાઃ સત્યવચનાજ્જાતઃ કીર્તિતસ્વરૂપતઃ ॥ ૧૯૪॥

વૃક્ષાદિરૂપતોઽદ્રિભ્યો જાત ઇત્યદ્રિજાઃ સ્મૃતઃ ।
ઋતં સત્યં પરં બ્રહ્મ હંસ ઇત્યાદિનોદિતમ્ ॥ ૧૯૫॥

યજ્જગત્તત્સમસ્તં ચ બ્રહ્મૈવ જ્ઞાનિદૃષ્ટિતઃ ।
યમાજ્જાતા ન પરા નૈવ કિંચ-
નાસ ય આવિવેશ ભુવનાનિ વિશ્વા ।
પ્રજાપતિઃ પ્રજયા સંવિદાન્-
અસ્ત્રીણિ જ્યોતીँ ષિ સચતે સ ષોડશી ॥

12.6ka

જગદાત્મત્વમુક્તં યત્તદત્ર પ્રતિપાદ્યતે ॥ ૧૯૬॥

સૃષ્ટેરૂર્ધ્વં સમુત્પન્નાઃ પ્રજા યસ્માન્મહેશ્વરાત્ ।

પરા ન વ્યતિરિક્તાઃ સ્યુર્નાપિ તત્પૂર્વભાવિનઃ ॥ ૧૯૭॥

editor: સૃષ્ટેઃ પૂર્વવર્તિપ્રજા નેશ્વરાદન્યા ઇત્યર્થઃ ।
સૃષ્ટેઃ પૂર્વં બ્રહ્મભિન્નં વસ્તુ નૈવાસ કિંચન ।
શ્રુત્યન્તરે હ્યેકમેવાદ્વિતીયં બ્રહ્મ સંશ્રુતમ્ ॥ ૧૯૮॥

નાપિ ચેતનજીવસ્ય બ્રહ્માન્યત્વમુપેયતે ।
ય ઈશઃ સર્વલોકસ્યાન્ દેહાગ્જીવાત્મનાવિશત્ ॥ ૧૯૯॥

અનેન જીવેનેત્યાદિશ્રુતિસંકીર્તિતત્વતઃ ।
પ્રજાપાલક ઈશોઽયં પ્રજયોત્પન્નયાત્મનઃ ॥ ૨૦૦॥

તાદાત્મ્યં લભમાનઃ સન્ વર્તતે કિંચ સોઽચ્યુતઃ ।
ત્રીણિ જ્યોતીંષિ સચતે સમવૈતિ તદાતમકઃ ॥ ૨૦૧॥

અગ્ન્યર્કચન્દ્રરૂપાણિ જ્યોતીંષીત્યર્થ ઈરિતઃ ।
પ્રશ્નોપનિષદુક્તા યાઃ કલાઃ ષોડશ તદ્યુતઃ ॥ ૨૦૨॥

તત્કલારૂપજગતા તાદાત્મ્યાત્ષોડશી શિવઃ ।
વિધર્તાર૨ઁ હવામહે વસોઃ કુવિદ્વનાતિ નઃ ।
સવિતારં નૃચક્ષસમ્ ॥

12.6kha

મન્ત્રાઃ કેચિદિહોચ્યન્તે સર્વેશપ્રાર્થનાત્મકાઃ ॥ ૨૦૩॥

બ્રહ્મવિજ્ઞાનલાભાય વેદેન હિતકારિણા ।
વસોર્જ્ઞાનસ્ય દાતારં વિધર્તારં વિશેષતઃ ॥ ૨૦૪॥

editor: વિશેષતો દાતારમિત્યન્વયઃ ।
અસ્મદ્બુદ્ધેઃ પ્રેરકત્વાત્સવિતારં નૃચક્ષહસમ્ ।
તત્ત્વવિદ્યાપ્રવક્તારં નૃણામાચાર્યરૂપતઃ ॥ ૨૦૫॥

અસ્મત્પ્રસાદસિદ્ધ્યર્થમાહ્વયામો મહેશ્વરમ્ ।
કુવિત્પ્રભૂતં જ્ઞાનાખ્યં ધનમીશો દદાતિ નઃ ॥ ૨૦૬॥

અદ્યાનો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ ।
પરા દુઃષ્વપ્નિય૨ઁ સુવ ॥

39.2

હે દેવ પ્રેરકાદ્યાસ્મિન્ દિને વિદ્યાભિલાષિણામ્ ।

નઃ શિષ્યાદિપ્રાજોપેનં ભાગ્યમાચાર્યતાત્મકમ્ ॥ ૨૦૭॥

સવીઃ પ્રયચ્છ દ્વૈતં ચ સ્વપ્નતુલ્યં પરાકુરુ ।
વિશ્વાનિ દેવ સવિતર્દુરિતાનિ પરાસુવ ।
યદ્ભદ્રં તન્મમ આસુવ ॥

39.3
સર્વાણ્યઘાનિ જ્ઞાનસ્ય પ્રતિબન્ધાન્ વિનાશય ॥ ૨૦૮॥

અસંભાવનયા હીનં વિપર્યયવિવર્જિતમ્ ।
યદસ્તિ તત્ત્વવિજ્ઞાનં તત્સાકલ્યેન દેહિ મે ॥ ૨૦૯॥

મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ॥

39.4
ઋતં બ્રહ્મેચ્છતે મહ્યં વાતા વાન્તુ સુખાવહાઃ ।
સ્યાદ્વાયૌ પ્રબલે રોગો વિઘ્નસ્તત્ત્વધિયો યતઃ ॥ ૨૧૦॥

અતો વાયોરાનુકૂલ્યં પ્રાર્થ્યતે જ્ઞાનકામિના ।
નદ્યઃ સમ્પાદયન્ત્વમ્બુ મધુરં રોગનાશકમ્ ॥ ૨૧૧॥

બ્રીહ્યાદ્યા મધૂરાઃ સન્તુ પથ્યરૂપા ભવન્તુ નઃ ।
મધુ નક્તમુતોષસિ મધુમત્પાર્થિવꣳ રજઃ ।
મધુદ્યૌરસ્તુ નઃ પિતા ॥

39.5
રાત્રૌ દિવા ચ નોઽસ્માકં સુખમસ્ત્વનુકૂલતઃ ॥ ૨૧૨॥

મા ભૂત્કાલકૃતો વિઘ્નો જ્ઞાનસ્યેત્યર્થ ઈરિતઃ ।
editor: અનુકૂલત ઇતિ ; સાર્વવિભક્તિકસ્તસિઃ probably sarvavibhaktikaH
। અનુકૂલમિત્યર્થઃ ।
પાર્થિવં શયનન્દિસ્થં રજો મધુમદસ્તુ નઃ ॥ ૨૧૩॥

અનુકૂલં તદપ્યસ્તુ કણ્ટકાદિવિવર્જિતમ્ ।
દ્યૌઃ પિતા પૃથવી માતેત્યેવં શ્રુત્યા પિતા હિ સા ॥ ૨૧૪॥

મધુમાન્નો વનસ્પતિર્મધુમાꣳ અસ્તુ સૂર્યઃ ।
માધ્વીર્ગાવો ભવન્તુ નઃ ॥

39.6

ચૂતાદિર્મધુમાનસ્તુ મધુરૈરન્વિતઃ ફલૈઃ ।
અસ્ત્વેષુ જીવનોપાયો નોઽસ્મિન્ પ્રતિ મહીરુહઃ ॥ ૨૧૫ ॥

અકૃત્વાદિકસંતાપમનુકૂલપ્રકાશયુક્ ।
સૂર્યોઽસ્તુ ગાવો માધ્વીર્નો મધુરક્ષીરસંયુતાઃ ॥ ૨૧૬ ॥

ઘૃતં મિમિક્ષિરે ઘૃતમસ્ય યોનિ-
ર્ઘૃતે શ્રિતો ઘૃતમુવસ્ય ધામ ।
અનુષ્વધમાવહ માદયસ્વ
સ્વાહાકૃતં વૃષભ વક્ષિ હવ્યમ્ ॥

12.7

દેહાનુકૂલ્યં સમ્પ્રાર્થ્ય ભોગસ્ય સકલસ્ય ચ ।
જ્ઞાનહેતુક્રિયાહેતિરગ્નેસ્તત્પ્રાર્થ્યતેઽત્ર તુ ॥ ૨૧૭ ॥

editor: તત્; આનુકૂલ્યમ્ ।
ઘૃતમગ્નૌ સિક્તવન્તો યજમાનઃ પુરાતનાઃ ।
હેતુર્વહ્નિર્ઘૃતં તેન જ્વાલાનામભિવૃદ્ધિતઃ ॥ ૨૧૮ ॥

અતો ઘૃતે શ્રિતો વહ્નિર્ઘૃતમેવાસ્ય ધામ ચ ।
અનુસૃત્ય સ્વધામન્નમસ્મદીયં હવિર્વહ ॥ ૨૧૯ ॥

દેવાનત્રાનયાનીય માદયસ્વ મુદાન્વિતાન્ ।
કુરુ હે વૃષભશ્રેષ્ઠ હવ્યં સ્વાહાકૃતં વહ ॥ ૨૨૦ ॥

સ્વાહાકારેણ ચાસ્માભિર્દત્તં પ્રાપય દેવતાઃ ।
editor: હવિર્વહેતિ ; આવહેતિ યાવત્ । તસ્યૈવાર્થો દેવાનત્રાનયેતિ ।
સમુદ્રાદૂર્મિર્મધુમાઁ ઉદાર-
દુપાઁ શુના સમમૃતત્વમાનટ્ ।
ઘૃતસ્ય નામ ગુહ્યં યદસ્તિ
જિહ્વા દેવાનામમૃતસ્ય નાભિઃ ॥

12.8

સમુદ્રવત્સમધિકાત્પરિપૂર્ણપરાત્મણઃ ॥ ૨૨૧ ॥

ઊર્મિતુલ્યપ્રપઞ્ચોઽયં મધુમાન્ ભોગ્ય ઉત્થિતઃ ।
અબ્ધેસ્તરઙ્ગવત્સર્વં ભોગ્યમીશાદજાયત ॥ ૨૨૨ ॥

ઘૃતં દીપ્તં સ્વપ્રકાશં તસ્ય પ્રણવલક્ષનમ્
માન સર્વેષુ વેદેષુ યદ્ગોપ્યં વિદ્યતે મહત્ ॥ ૨૨૩॥

editor: ઘૃતમિતિ; -ઘૃ ક્ષરણદીપ્ત્યોઃ - ઇતિ ધાતુઃ ।
તેન પ્રણવરૂપેણોપાંશુન ધ્યાનકાલતઃ ।
શનૈરુચ્ચાર્યમાણેનામૃતત્વં નાશવર્જિતમ્ ॥ ૨૨૪॥

બ્રહ્માનટ્ સમ્યગાપ્નોતિ તચ્ચ જિહ્વા દિવૌકસામ્ ।
તૈર્ધ્યાનતત્પરૈર્નિત્યં કીર્ત્યત્વાદાસ્યમધ્યતઃ ॥ ૨૨૫॥

વર્તતે કિંચ મોક્ષસ્ય નાભિરાશય ઉચ્યતે ।
એતદ્ધ્યેવાક્ષરં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ ૨૨૬॥

ઇતિ શ્રુત્યન્તરોક્તત્વાદનેનાપ્યં હિ તત્ફલમ્ ।
એતસ્યામૃચિ તારસ્ય મોક્ષસાધનતોદિતા ॥ ૨૨૭॥

વયં નામ પ્રબ્રવામા ઘૃતેના-
સ્મિન્યજ્ઞે ધારયામા નમોભિઃ ।
ઉપ બ્રહ્મા શ‍ૃણવચ્છસ્યમાનં
ચતુઃશ‍ૃઙ્ગોઽવમીદ્ગૌર એતત્ ॥

12.9

અસ્મિન્ યજ્ઞે જ્ઞાનયજ્ઞે વયં જ્ઞાનાભિલાષિણઃ ।
બ્રહ્માત્મના નિમિત્તેન નામ પ્રણવસંજ્ઞકમ્ ॥ ૨૨૮॥

પ્રભવામોચ્ચારયામો ધ્યાયન્તઃ સર્વદા તતઃ ।
નમસ્કારૈર્યુતાશ્ચિત્તે ધારયામો મહેશ્વરમ્ ॥ ૨૨૯॥

શસ્યમાનં સ્તૂયમાનમસ્માભિઃ પ્રણવેન ચ ।
બ્રહ્મૈતચ્છ્રુયમાણં ચ પાર્શ્વસ્થૈર્બ્રહ્મવેદિભિઃ ॥ ૨૩૦॥

અકારાદિકનાદાન્તચતુઃશ‍ૃઙ્ગસમન્વિતઃ ।
પ્રણવાખ્યો વૃષઃ શ્વોતો વાન્તવાન્પ્રત્યપાદયત્ ॥ ૨૩૧॥

ચત્વારિ શ‍ૃઙ્ગા ત્રયો અસ્ય પાદા
દ્વેશીર્ષે સપ્ત હસ્તાસો અસ્ય ।
ત્રિધા બદ્ધો વૃષભો રોરવીતિ
મહો દેવો મર્ત્યાઁ આવિવેશ ॥

12.10

પ્રણવપ્રતિપાદ્યત્વાદસ્ય પ્રણવરૂપિણઃ ।
અકારાદીનિ ચત્વારિ શ‍ૃઙ્ગાણિ પરમાત્મણઃ ॥ ૨૩૨॥

બ્રહ્મૈભિર્ગમ્યતે તત્ત્વમિતિ પાદાઃ સમીરિતાઃ ।
વિશ્વશ્ચ તૈજસઃ પ્રાજ્ઞ ઇત્યશ્ચાત્મં ત્રયોઽઙ્ઘ્રયઃ ॥ ૨૩૩॥

વિરાડ્ઢિરણ્યગર્ભશ્ચાવ્યાકૃતશ્ચાધિદૈવતમ્ ॥

દ્વે શક્તી ચિદચિદ્રૂપે શિરઃસ્થાને સમીરિતે ॥ ૨૩૪॥

ભૂરાદયઃ સપ્ત લૂકાઃ હસ્તાઃ સ્યુઃ પરમાત્મનઃ ।
વિશ્વાદિભિર્વિરાડાદ્યૈસ્ત્રિધાકારાદિષુ ત્રિષુ ॥ ૨૩૫॥

સંબદ્ધઃ પ્રણવો બ્રહ્મ પ્રતિપાદયતિ સ્ફુટમ્ ।
સ્પષ્ટં પ્રણવવેદ્યં તદ્દેવ ઇત્યાદિનોચ્યતે ॥ ૨૩૬॥

પ્રવિષ્ટઃ સર્વતો મર્ત્યાન્નરદેહાન્મહેશ્વરઃ ॥

નખાગ્રાવધિદેહેઽયં સમ્પ્રવિષ્ટ ઇતિ શ્રુતિઃ ॥ ૨૩૭॥

ત્રિધા હિતં પણિભિર્ગુહ્યમાનં
ગવિ દેવાસો ઘૃતમન્વવિન્દન્ ।
ઇન્દ્ર એકꣳ સૂર્ય એકં જજાન
વેનાદેકꣳ સ્વધયા નિષ્ટતક્ષુઃ ॥

12.11

દેહે વિશ્વાદિસંજ્ઞેન ત્રિપ્રકારેણ સંસ્થિતમ્ ।
વિરાડાદિકસંજ્ઞેન બ્રહ્માણ્ડે ચ ત્રિધા સ્થિતમ્ ॥ ૨૩૮॥

ગોપ્યમાનં રહસ્યત્વાદાચાર્યૈર્બ્રહ્મ ભાસ્વરમ્ ।
લબ્ધવન્તો મહાવાક્યે દેવવત્સાત્ત્વિકા નરાઃ ॥ ૨૩૯॥

યત્ ત્રિધા હિતમિત્યુક્તમેતદેવ વિવિચ્યતે ।
સમુત્પાદિતવાનેકં વિરાડ્ જાગરણાત્મકમ્ ॥ ૨૪૦॥

હિરણ્યગર્ભોઽયનયત્સ્વપ્નરૂપં પ્રભાવવાન્ ।
સુષુપ્તરૂપં સંજાતં વેનાદખ્યાકૃતાત્મનઃ ॥ ૨૪૧॥

વેનેતિ કાન્તિકર્મા સ્યાત્સર્વદુઃખવિવર્જનાત્ ।
કમનીયોઽખ્યાકૃતઃ સ્યાદિત્યેવમવગમ્યતામ્ ॥ ૨૪૨॥

editor: વેનેતિ ; ધાતુરિતિ શેષઃ ।
ધીયતે સ્થાપ્યતે સ્વસ્મિન્નિતિ બ્રહ્માત્મિકા ચિતિઃ ।
આશ્રયાન્તરહીનેયં સ્વધાશબ્દેન કીર્ત્યતે ॥ ૨૪૩॥

તયોત્પાદિતવન્તસ્તે ત્રયો જાગરણાદિકમ્ ।
યો દેવાનાં પ્રથમં પુરસ્તા-
દ્વિશ્વાધિકો રુદ્રો મહર્ષિઃ ।
હિરણ્યગર્ભં પશ્યત જાયમાનꣳ
સ નો દેવઃ શુભયાસ્મૃત્યા સંયુનક્તુ ॥

12.12
દ્રવત્યેતિ રુદં શબ્દં વૈદિકં રુદ્દ્ર ઉચ્યતે ॥ ૨૪૪॥

વેદગમ્યો મહાગ્શ્રેષ્ઠોઽતીન્દ્રિયો દ્રષ્ટ્રમધ્યતઃ ।
હિરણ્યગર્ભં યો દેવઃ પશ્યતિ સ્વપ્રકાશચિત્ ॥ ૨૪૫॥

આદિભૂતં સમસ્તાનામિન્દ્રાદીનાં દિવૌકસામ્ ।
પુરસ્તાજ્જન્મનાં કીર્ત્યા દેવાનાં જન્મતઃ પુરા ॥ ૨૪૬॥

પુરસ્તાજ્જન્મસંકીર્ત્યા તત્પ્રાથમ્યં સ્ફુટીકૃતમ્ ।
સ દેવઃ શુભયા સ્મૃત્યા સર્વસંસારઘાતિના ॥ ૨૪૭॥

બ્રહ્મસ્મૃત્યા સંયુનક્તુ સંયુક્તાન્ પ્રકરોતુ નઃ ।
મન્ત્રોઽયં બ્રહ્મવિદ્યાયાઃ પ્રાપ્તયે જપ્યતાં બુધૈઃ ॥ ૨૪૮॥

ઇતિ પ્રતીયતેઽસ્માકં મન્ત્રલિઙ્ગસ્ય તત્ત્વતઃ ।
યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિ-
દ્યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કશ્ચિત્ ।
વૃક્ષ ઇવ સ્તબ્ધો દિવિ તિષ્ઠ-
ત્યેકસ્તેનેદં પૂર્ણં પુરુષેણ સર્વમ્ ॥

12.13
યદુક્તં શુભયેત્યાદિ સ્મર્તવ્યં તદિહોચ્યતે ॥ ૨૪૯॥

ઉત્કૃષ્ટમપકૃષ્ટં વા વસ્તુ યસ્માન્ન વિદ્યતે ।
નાલ્પં યસ્માદ્બ્રહ્મણોઽસ્તિ નાધિકં વસ્તુ કિંચન ॥ ૨૫૦॥

ગુણાત્કર્ષાપકર્ષૌ તુ પરાપરપરોદિતૌ ।

માનોત્કર્ષાદિકં પ્રોક્તં જ્યાય ઇત્યાદિશબ્દતઃ  ॥ ૨૫૧॥

સર્વથા તન્નિષેધેનાદ્વિતીયત્વં હિ સિધ્યતિ
editor: ઉત્કર્ષાપકર્ષનિષેધેનેત્યર્થઃ ।
વૃક્ષઃ સ્તબ્ધો યથૈકત્ર ગત્યાદિરહિતસ્તથા ॥ ૨૫૨॥

સ્વપ્રકાશસ્વરૂપોઽસૌ નિર્વિકારોઽવતિષ્ઠતે ।
તેનેદં પૂર્ણમખિલં પુરુષેણ પરાત્મના ॥ ૨૫૩॥

નાસ્ત્યેવ જગદાકારો પરમાત્મૈવ સંસ્થિતઃ ।
ન કર્મણા ન પ્રજયા
ધનેન ત્યાગેનૈકે અમૃતત્વમાનશુઃ ।
પરેણ નાકં નિહિતં ગુહાયાં
બિભ્રાજતે યદ્યતયો વિશન્તિ ॥

12.14
બ્રહ્મસ્મૃતાવન્તરઙ્ગં ત્યાગો હેતુરિહોચ્યતે ॥ ૨૫૪॥

તચ્ચામૃતત્ત્વં ન પ્રાપ્યમગ્નિહોત્રાદિકર્મણા ।
પુત્રાદિના ધનેનાપિ કિંતુ કર્માદિહાનતઃ ॥ ૨૫૫॥

વ્યાપારાણાં લૌકિકાનાં વૈદિકાનાં ચ વર્જનાત્ ।
કેચિદન્તર્મુખા એવામૃતત્વં પ્રાપ્નુવન્તિ તત્ ॥ ૨૫૬॥

જિતેન્દ્રિયા યદ્વિશન્તિ તત્સ્વર્ગાતુત્તમં ચ સત્ ।
એકાગ્રબુદ્ધિનિષ્ઠં સદ્વિશેષેણ પ્રકાશતે ॥ ૨૫૭॥

અન્તર્મુખૈઃ સદ્ભિરેવ બ્રહ્મ તચ્ચાનુભૂયતે ।
વેદાન્તવિજ્ઞાનવિનિશ્ચિતાર્થાઃ
સંન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ।
તે બ્રહ્મલોકે તુ પરાન્તકાલે
પરામૃતાઃ પરિમુચ્યન્તિ સર્વે ॥

દહ્રં વિપાપં વરવેશ્મભૂત યત્પુણ્ડરીકં
પુરમધ્યસ ँ સ્થમ્ ।
તત્રાપિ દહ્રં ગગનં વિશોકમ્
તસ્મિન્યદન્તસ્તદુપાસિતવ્યમ્ ॥

યો વેદાદૌ સ્વરઃ પ્રોક્તો

વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય
યઃ પરઃ સ મહેશ્વરઃ ॥

12.15, 16, 17
ત્યાગસ્ય મોક્ષહેતુત્વં પૂર્વસ્યામૃચિ કીર્તિતમ્ ॥ ૨૫૮॥

જ્ઞાનસ્ય તરતીત્યાદૌ શ્રુતૌ તદ્બહુશઃ શ્રુતમ્ ।
અતસ્તયોઃ પૃથઙ્ મુક્તાવુપયોગોઽત્ર વર્ણ્યતે ॥ ૨૫૯॥

વિરોધપરિહારાય તયોઃ શ્રુત્યોર્યથોક્તયોઃ ।
વેદાન્તવાક્યજજ્ઞાનનિશ્ચિતાત્મૈક્યશાલિનઃ ॥ ૨૬૦॥

સંન્યાસપૂર્વકો યોગઃ સર્વવૃત્તિવિનિગ્રહઃ ।
તસ્માદ્વિશુદ્ધસત્ત્વાશ્ચ ભોગવ્યાવૃત્તચેતસઃ ॥ ૨૬૧॥

અતો નિયમનાસક્તા યતયઃ પરિકીર્તિતાઃ ।
જ્ઞાનં તત્ત્વસ્ય સંસ્ફૂર્ત્યાવિદ્યાયા વિનિવર્તકમ્ ॥ ૨૬૨॥

ત્યાગો નિવર્તયેદ્ભોગં ચિત્તશુદ્ધેસ્તુ કાર્ણમ્ ।
ઇતિ મુક્તૌ તયોરુક્તા પૃથગેવોપયોગિતા ॥ ૨૬૩॥

બ્રહ્મસંદર્શને જાતે તે સંસારવિલક્ષણાઃ ।
વૈલક્ષણ્યદ્યોતનાર્થસ્તુશબ્દઃ પરિકીર્તિતઃ ॥ ૨૬૪॥

અજ્ઞાનાશે દેહસ્ય પતનાવસરઃ સ્મૃતઃ ।
પરાન્તકાલો ભૂયશ્ચ દેહગ્રહણવર્તનાત્ ॥ ૨૬૫॥

તસ્મિન્ સર્વે વિમુચ્યન્તે દેવા વા માનુષાસ્તથા ।
ઉત્તમાધમભાવસ્તુ ભવેદત્રાપ્રયોજકઃ ॥ ૨૬૬॥

જગદ્ધેતુતયોત્કૃષ્ટમમૃતં નાશવર્જિતમ્ ।
તત્ત્વજ્ઞાનં વિના લબ્ધ્વાવ્યાકૃતં પરિકીર્તિતમ્ ॥ ૨૬૭॥

અવ્યાકૃતાદ્વિમુચ્યન્તે જ્ઞાનિનો દેહપાતતઃ ।
editor: તત્કાલ એવેત્યર્થઃ ।
અજ્ઞાનિનસ્તુ પ્રલયે દેહબન્ધી ગતેઽપિ ચ ॥ ૨૬૮॥

અજ્ઞાનાન્ન હિ મુચ્યન્તે મુચ્યન્તે જ્ઞાનિનસ્તદા ।
દેહ્ને વિપાપ્મમિત્યાદ્યા વ્યાખાતાઃ પદ્યરૂપતઃ ॥ ૨૬૯॥

ન્યાયરત્નાવલીગ્રન્થ ઇતિ ચાત્રોપરમ્યતે ।
ઇતિ દશમોઽનુવાકઃ
footnote ઇતઃ પરમેકાદશાદ્દ્વાદશાનિવાકૌ ન વિદ્યતે ।
આદિત્યો વા એષ એતન્મણ્ડલં તપતિ તત્ર તા ઋચસ્તદૃચા
મણ્ડલꣳ
સ ઋચાં લોકોઽથ ય એષ એતસ્મિન્મણ્ડલેઽર્ચિર્દીપ્યતે તાનિ
સામાનિ સ
સામ્નાં લોકોઽથ ય એષ એતસ્મિન્મણ્ડલેઽર્ચિષિ પુરુષસ્તાનિ
યજૂꣳષિ સ યજુષા મણ્ડલꣳ સ યજુષાં લોકઃ સૈષા
ત્રય્યેવ
વિદ્યા તપતિ ય એષોઽન્તરાદિત્યે હિરણ્મયઃ પુરુષઃ ।
14
રવિબિમ્બે પરેશસ્યોપાસનં કથ્યતેઽધુના ॥ ૨૭૦॥

પૂર્વાનુવાકાભિહિતો યો નારાયણશબ્દિતઃ ।
સ એવ રવિરૂપેણ વર્તતે પરમેશ્વરઃ ॥ ૨૭૧॥

દૃશ્યમાનં રવેરેતદ્વર્તુલાકારમણ્ડલમ્ ।
તેજઃપુઞ્જં તપત્યુષ્ણં તત્ર તસ્મિંશ્ચ મણ્ડલે ॥ ૨૭૨॥

તાઃ પ્રતિદ્ધા ઋચઃ સન્તિ તત્તસ્માત્કારણાદૃચઃ ।
નિષ્પાદિતં મણ્ડલં સ્યાદૃચસ્તન્માનિદેવતાઃ ॥ ૨૭૩॥

તાસાં સ બિમ્બભાગોઽયં નિવાસઃ પરિકીર્તિતઃ ।
ઋગાત્મકત્વં બિમ્બસ્ય ધ્યાત્વાથ તદનન્તરમ્ ॥ ૨૭૪॥

યદેતન્મણ્ડલે તેજો ભાસ્વરં સમ્પ્રકાશતે ।
તાનિ તેજઃસ્વરૂપાણિ સામાનીતિ વિચિન્તયેત્ ॥ ૨૭૫॥

સોઽર્ચિર્ભાગો નિવાસઃ સ્યાત્સામ્નાં તદભિમાનિનામ્ ।
સામધ્યાનાન્તરં ચ ચિન્તયેદ્યજુરાત્મકમ્ ॥ ૨૭૬॥

શાસ્ત્રપ્રસિદ્ધો દેવાત્મા મણ્ડલેઽર્ચિષિ વર્તતે ।
તાનિ દેવસ્વરૂપાણિ યજૂંષીતિ વિચિન્તયેત્ ॥ ૨૭૭॥

જયુરાત્મા સ ચ પુમાન્યજુષા કૃતમણ્ડલમ્ ।
ઇતિ ધ્યાયેદ્યજુર્ભાગઃ સ યજુર્દેવતાલયઃ ॥ ૨૭૮॥

યન્મણ્ડલં યદર્ચિશ્ચ તત્રત્યપુરુષશ્ચ યઃ ।
એતત્રિતયરૂપૈષા વિદ્યા ત્રય્યેવ ભાસતે ॥ ૨૭૯ ॥

editor: ઋગ્યજુઃસામાત્મિકૈવેત્યર્થઃ ।
અત્રોક્તો યઃ પુમાનેષ રવિમણ્ડલમધ્યગઃ ।
હિરણ્યમયોઽસ્તિ તત્ત્વં ચ પ્રસિદ્ધમિતરત્ર હિ ॥ ૨૮૦ ॥

હિરણ્મયત્વં ચ શાખાન્તરે પ્રસિદ્ધમિત્યર્થઃ । - અથ ય
એષોઽન્તરાદિત્યો હિરણ્મયઃ પુરુષો દૃશ્યતે - ઇતિ શ્રુતેઃ
( છન્દોગ્યે ૧-૩-૩)૪
ઇતિ ત્રયોદશોઁઉવાકઃ
આદિત્યો વૈ તેજ ઓજો બલં યશશ્ચક્ષુઃ શ્રોત્રમાત્મા મનો
મન્યુર્મનુર્મૃત્યુઃ
સત્યો મિત્રો વાયુરાકાશઃ પ્રાણો લોકપાલઃ કઃ કિં કં
તત્સત્યમન્નમમૃતો
જીવો વિશ્વઃ કતમઃ સ્વયમ્ભુ બ્રહ્મૈતદમૃત એષ પુરુષ એષ
ભૂતાનામધિપતિર્બ્રહ્મણઃ સાયુજ્યઁ
સલોકતામાપ્નોત્યેતાસામેવ
દેવતાનાઁ સાયુજ્યઁ સાર્ષ્ટિતાઁ
સમાનલોકતામાપ્નોતિ ય એવંવેદેત્યુપનિષત્ ।
15.1
સર્વાત્મકત્વરૂપં ચ પ્રાહોપાસ્યગુણં રવેઃ ।
ઉપાસ્યત્વેન યઃ પ્રોક્તઃ પૂર્વમર્કઃ સ એવ ચ ॥ ૨૮૧ ॥

તેજાદ્યધિપત્યન્તસમસ્તજગદાત્મકઃ ।
બલહેતુર્ભવેદોજો દેહશક્તિર્બલં સ્મૃતમ્ ॥ ૨૮૨ ॥

આત્મા દેહો મનિશ્ચત્તં મન્યુઃ ક્રોધઃ સમીરિતઃ ।
મનુઃ સ્વાયંભુવાદિઃ સ્યાન્મૃત્યુર્યમ ઉદીરિતઃ ॥ ૨૮૩ ॥

સ્યુર્દેવતાવિશેષાસતુ સત્યાદ્યાસ્તે ચ સંસ્ફુટાઃ ।
કઃ પ્રજાપતિરિત્યુક્તઃ કિંશબ્દેન તદુચ્યતે ॥ ૨૮૪ ॥

વાચા વિશેષતો વક્તુમયોગ્યં વસ્તુ યદ્ભવેત્ ।
કં સુખં તત્પરોક્ષં સ્યાત્સત્યં ત્વનૃતવર્જતમ્ ॥ ૨૮૫ ॥

અન્નં વ્રીહ્યાદિરાયુસ્તુ શતંસવત્સરાદિકમ્ ।

અમૃતો મૃતિહીનઃ સ્યાચ્ચિદાત્મા જીવ ઉચ્યતે ॥ ૨૮૬॥

સ ચ દેહવિભેદેન વિશ્વો નાનાવિધઃ સ્મૃતઃ ।
અતીવ સુખરૂપોઽયં કતમઃ પરિકીર્તિતઃ ॥ ૨૮૭॥

અનુત્પન્નઃ સ્વયંભુઃ સ્યાચ્છાન્દસં તુ સ્વયં ત્વિતિ ।
પ્રજાપાલકરાજાદિઃ પ્રજાપતિરિતીરિતઃ ॥ ૨૮૮ ।
ઇતિઃ પ્રદર્શનાર્થઃ સ્યાદિત્યાદિસકલસ્ય ચ ।
આદિત્યજત્વાદાદિત્યઃ સંવત્સર ઉદીરિતઃ ॥ ૨૮૯॥

ય એષ પુરુષઃ સર્વઃ સ એવ પ્રાણિનામપિ ।
ભવત્યધિપતિઃ સ્વામીત્યેવં મન્ત્રાર્થ ઈરિતઃ ॥ ૨૯૦॥

સર્વઃ સર્વાત્મક ઇત્યર્થઃ ।
ઉક્ત્વોપાસ્યગુણાનેવં ફલમત્ર પ્રદર્શ્યતે ।
ઉપાસ્તે યઃ પુમાનેવ સ સાયુજ્યાદ્યવાપ્નુયાત્ ॥ ૨૯૧॥

હિરણ્યગર્ભોપાસ્તિશ્ચ તદઙ્ગાનામુપસનમ્ ।
ઇત્યુપાસ્તિર્દ્વિધાદ્યે ચ ભાવનતિશયે સતિ ॥ ૨૯૨॥

હિરણ્યગર્ભસાયુજ્યં તાદ્રૂપ્યં પ્રતિપદ્યતે ।
ભાવનામન્દતાયાં ચ તત્સાલોક્યં સમશ્નુતે ॥ ૨૯૩॥

દ્વિતીયે ભાવનાધિક્યે દેવસાયુજ્યમશ્નુતે
ભાવનામધ્યતાયાં ચ સમાનૈશ્વર્યમશ્નુતે ॥ ૨૯૪॥

તન્માન્દ્યે ચ સલોકત્વમિન્દ્રાદીનાં પ્રપદ્યતે ।
એવં રહસ્યવિદ્યોક્તા સમાપ્તિમગમચ્છુભા ॥ ૨૯૫॥

ઇતિ ચતુર્દશોંઉવાકઃ
ઘૃણિઃ સૂર્ય આદિત્યોમર્ચયન્તિ તપઃ સત્યં મધુ ક્ષરન્તિ
તદ્બ્રહ્મ તદાપ આપો જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ
સુવરોમ્ ।
15.2
ઘૃણિર્દીપ્તિયુતઃ સૂર્યઃ સૂર્ય ઇત્યભિધાનવાન્ ।
આદિત્ય અદિતેઃ પુત્રઃ સોઽહમસ્મિ તથાવિધમ્ ॥ ૨૯૬॥

editor: ઓમિત્યસ્યાર્થમાહ—સોઽહમિતિ । તથાવિધમાદિત્યમિત્યન્વયઃ
।

આદિત્યં પુરુષાઃ સર્વેઽપ્યર્ચયન્તિ ફલાર્થિનઃ ।
તમાદિત્યં સમુદ્દિશ્ય તપઃ કુર્વન્તિ સાધવઃ ॥ ૨૯૭॥

સમર્પયન્તિ નૈવેદ્યં મધુક્ષીરાદિકં બુધાઃ ।
તદાદિત્યાત્મકં વસ્તુ વેદો વા બ્રહ્મ વા પરમ્ ॥ ૨૯૮॥

editor: પરં બ્રહ્મેત્યન્વયઃ ।
આદિત્યરૂપં તચ્ચાપો વૃષ્ટિનિષ્પાદકત્વતઃ ।
યાઃ સમુદ્રાદિગા આપો યજ્જ્યોતિર્દહનાદિકમ્ ॥ ૨૯૯॥

મધુરાદિરસો યશ્ચ યત્સુધાસંજ્ઞકામૃતમ્ ।
યદ્બ્રહ્મન્નજાતં ચ યે ચ ભૂરાદયસ્ત્રયઃ ॥ ૩૦૦॥

editor: લોકા ઇતિ શેષઃ
આદિત્યરૂપં તત્સર્વમોમિત્યર્થઃ પ્રકીર્તિતઃ ।
ઇતિ પઞ્ચદશોઽનુવાકઃ
સર્વો વૈ રુદ્રસ્તસ્મૈ રુદ્રાય નમોઽસ્તુ ।
પુરુષો વૈ રુદ્રઃ સન્મહો નમો નમઃ ।
વિશ્વં ભૂતં ભુવનં ચિત્રં બહુધા જાતં જાયમાનં ચ
યત્ ।
સર્વો હ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય નમો અસ્તુ ॥

24
રુદ્રઃ પ્રસિદ્ધો ગૌરીશઃ સર્વઃ સર્વાત્મકઃ સ્મૃતઃ ॥ ૩૦૧॥

જીવરૂપેણ દેહેષુ સમસ્તેષુ પ્રવેશતઃ ।
editor: સર્વાત્મકત્વે હેતુમાહ—જીવેતિ ।
મનોઽસ્તુ તસ્મૈ રુદ્રાય સર્વરૂપાય શંભવે ॥ ૩૦૨॥

યશ્ચિદાત્માસ્તિ પુરુષો વિનાશ્ય પ્રકૃતિં જડામ્ ।
સ ભક્તાનુગ્રહાયૈવ રુદ્રમૂર્ત્યાવભાસતે ॥ ૩૦૩॥

સન્મહોઽબાધિતં તેજઃ સદેવેત્યાદિકશ્રુતેઃ ।
અબાધ્યસ્વપ્રકાશાય નતિરસ્તુ પુનઃ પુનઃ ॥ ૩૦૪॥

યજ્જડં વિશ્વમસ્તીદં યદ્ભૂતં ચેતનાત્મકમ્ ।
ઇત્થં ચિદચિદાત્મત્વાચ્ચિત્રં યદ્ભુવનં જગત્ ॥ ૩૦૫॥

તત્રાપિ યજ્જગજ્જાતં જાયમાનં ચ યજ્જગત્ ।

સ સર્વોઽપિ પ્રપઞ્ચોઽયમેષ રુદ્રો હિ વસ્તુતઃ ॥ ૩૦૬॥

ન નિરૂપયિતું શક્યં તદ્ધિ તદ્વ્યતિરેકતઃ ।
તસ્મૈ રુદ્રાય મહતે નમોઽસ્તુ સકલાત્મને ॥ ૩૦૭॥

ઇતિ ષોડશોઽનુવાકઃ
કદ્રુદ્રાય પ્રચેતસે મીઢુષ્ટમાય તવ્યસે । વોચેમ
શંતમꣳ હૃદે ।
સર્વો હ્યેષ રુદ્રસ્તસ્મૈ રુદ્રાય નમો અસ્તુ ॥

25
શ્લાઘાર્થકત્થધાતૂત્થં પ્રશંસામાહ કત્પદમ્ ।
તતઃ પ્રશસ્તરુદ્રાય કદ્રુદ્રાય પ્રચેતસે ॥ ૩૦૮॥

પ્રકટજ્ઞાનયુક્તાય કામસેક્તૃતમાય ચ ।
કામપ્રદાય સ્તવ્યાય સ્તોતું યોગ્યાય તવ્યસે ॥ ૩૦૯॥

હૃદે હૃદયવર્તિત્વાત્તદ્રૂપાય ચ શંતમમ્ ।
વચઃ સુખતમં સ્તોત્રં કથયામ મહેશ્વર ॥ ૩૧૦॥

સર્વો હીત્યાદિકં વાક્યં વ્યાખ્યાતં પૂર્વમેવ હિ ।
ઇતિ સપ્તદશોઽનુવાકઃ
નમો હિરણ્યબાહવે હિરણ્યપતયેઽમ્બિકાપતય ઉમાપતયે
પશુપતયે નમો નમઃ ॥

22
i.v. has hiraNyavarNAya hiraNyarUpAya
after hiraNyabAhave
અત્ર વાહુપદં જ્ઞેયં સમસ્તાઙ્ગોપલક્ષણમ્ ॥ ૩૧૧॥

સુવર્ણમયદેહાય સ્વભક્તાનુજિઘૃક્ષયા ।
જગન્માતામ્બિક તસ્યાઃ પતિર્ભર્તા સમીરિતઃ ॥ ૩૧૨॥

બ્રહ્મવિદ્યાત્મકો દેહસ્તસ્યાશ્ચોમાપદોદિતઃ ।
તાદૃશ્યાઃ સ્વામિને તસ્મૈ નતિરસ્તુ પુનઃ પુનઃ ॥ ૩૧૩॥

અનુવાકત્રયેણૈવં યે મન્ત્રાઃ પરિકીર્તિતાઃ ।
તેષાં ત્વરિતરુદ્રાખ્યા પ્રસિદ્ધા મન્ત્રકલ્પતઃ ॥ ૩૧૪॥

editor: મન્ત્રકલ્પેષ્વિત્યર્થઃ ।
રુદ્રાધ્યાયજપે જપ્યાઃ કલ્પેષુ પરિકીર્તિતાઃ ।
editor: રુદ્રાધ્યાયજપશેષત્વેન વિનિયોગમાહ—રુદ્રેતિ ।
ઇત્યષ્ટદશોઽનુવાકઃ
footnote ઇતઃ પરં ષટ્ત્રિંશાનુવાકપર્યન્તં ન વિવૃતમ્ ।
પ્રાણાનાં ગ્રન્થિરસિ રુદ્રો મા વિશાન્તક-
સ્તેનાન્નેનાપ્યાયસ્વ ॥

74, internet version splits after vishAntakaH
હૃદયસ્પર્શમન્ત્રોઽયમધુના પરિકીર્ત્યતે ॥ ૩૧૫॥

વાયૂનામિન્દ્રિયાણાં ચ દૃઢગ્રથનસાધનમ્ ।
ભવતિ ત્વમહંકાર હૃદયસ્થાનસંસ્થિતઃ ॥ ૩૧૬॥

તવાભિમાની રુદ્રો યસ્તદ્રૂપસ્ત્વં વિનાશકઃ ।
દુઃખસ્ય ભૂત્વા વિશ માં પ્રવિષ્ટો મદ્વપુર્ભવ ॥ ૩૧૭॥

અન્નેન તેન ભુક્તેન મામાપ્યાયસ્ય વર્ધય ।
editor: ત્વં દુઃખસ્ય વિનાશકો ભૂત્વેત્યન્વયઃ ।
ઇતિ સપ્તત્રિંશોઽનુવાકઃ
અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽઙ્ગુષ્ઠં ચ સમાશ્રિતઃ ।
ઈશઃ સર્વસ્ય જગતઃ પ્રભુઃ પ્રીણાતુ વિશ્વભુક્ ॥

71
ક્ષુદાદિજન્યવિક્ષેપે પ્રશાન્તે સતિ ચેતસઃ ॥ ૩૧૮॥

સ્વસ્વરૂપાનુસંધાને હેતુર્મન્ત્ર ઉદીર્યતે ।
editor: ચેતસો વિક્ષેપ ઇત્યન્વયઃ
હૃત્પુણ્ડરીકમધ્યસ્થં નભઃ સ્વાઙ્ગુષ્ઠમાનકમ્ ॥ ૩૧૯॥

તત્રાવસ્થિતબુદ્ધિશ્ચ તાવતી પરિકીર્તિતા ।
તદવચ્છિન્નજીવશ્ચ પુરુષોઽઙ્ગુષ્ઠમાનકઃ ॥ ૩૨૦॥

સ્વીયજ્ઞાનક્રિયાશક્ત્યા સ ચાઙ્ગુષ્ઠં સમાશ્રિતઃ ।
ચકારાન્મસ્તકં તદ્વદેવં ચાપાદમસ્તકમ્ ॥ ૩૨૧॥

વ્યાપીત્યર્થઃ સ ચોપાધિં વિના વાસ્તવરૂપતઃ ।
નિયન્તા સર્વજગતો વિશ્વભુક્ પ્રભુરીશ્વરઃ ॥ ૩૨૨॥

અનેન ભુજનેનાયં પ્રીતો ભવતિ શાશ્વતઃ ।
ઇત્યષ્ટત્રિંશોઽનુવાકઃ
મેધા દેવી જુષમાણા ન આગાદ્વિશ્વાચી ભદ્રા
સુમનસ્યમાના ।
ત્વયા જુષ્ટા જુષમાણા દુરુક્તાન્બૃહદ્વદેમ વિદથે સુવીરાઃ
॥

41.1
જીવેશ્વરૈક્યજ્ઞાનાપ્ત્યૈ મેધા દેવી પ્રશસ્યતે ॥ ૩૨૩॥

ગ્રન્થાર્થધારણે શક્તિર્મેધા તદભિમાનિની ।
દેવી નઃ પ્રીયમાણાગાદાયાત્વસ્માન્પ્રતીશ્વરી ॥ ૩૨૪॥

વિશ્વમઞ્ચતિ વિશ્વાચી સર્વસંગ્રહણક્ષમા ।
અનુગ્રાહકમસ્માકમિચ્છન્તી શોભનં મનઃ ॥ ૩૨૫॥

ભદ્રાત એવ કલ્યાણી દેવ્યાગચ્છતુ નઃ પ્રતિ ।
ત્વયા જુષ્ટા ગૃહીતાસ્તુ વયં દેવબહિઃસ્થિતાન્ ॥ ૩૨૬॥

શ્રેયોવિરોધિનઃ શબ્દાનભયન્તઃ સુપુત્રકા ।
editor: ગૃહીતાઃ, અનુગૃહીતા ઇત્યર્થઃ ।
સુવીરાઃ સાધુશિષ્યાશ્ચ વિદથેઽનુષ્ઠિતે સતિ ॥ ૩૨૭॥

યાગે વિશુદ્ધમનસો બ્રહ્મ યત્કથયામ તત્ ।
ત્વયા જુષ્ટ ઋષિર્ભવતિ દેવિ
ત્વયા બ્રહ્માગતશ્રીરુત ત્વયા ।
ત્વયા જુષ્ટશ્ચિત્રં વિન્દતે વસુ
સા નો જુષસ્વ દ્રવિણેન મેધે ॥

41.2
ત્વયા દેવિ ગૃહીતોઽમુ સ્યાદતીન્દ્રિયદર્શનઃ ॥ ૩૨૮॥

ત્વયા જુષ્ટઃ પુમાન્બ્રહ્મા ભવતીહ પ્રજાપતિઃ ।
editor: અનુગૃહીત ઇત્યન્વયઃ । બ્રહ્મા ; હિરણ્યગર્ભ ઇત્યર્થઃ ।
ઉતાપિ ચ ત્વયા જુષ્ટઃ પ્રાપ્તસમ્પદ્ભવત્યયમ્ ॥ ૩૨૯॥

અત એવ ત્વયા જુષ્ટો ગોભૂહેમાદિકં ધનમ્ ।
લભતે વિવિધં મેધે સા ત્વં સ્વેન ગૃહાણ નઃ ॥ ૩૩૦॥

editor: સ્વેન ; ધનેનાનુગૃહાણેત્યર્થઃ ।
ઇત્યેકોનચત્વરિંશઓऽનુવાકઃ
મેધાં મ ઇન્દ્રો દદાતુ મેધાં દેવી સરસ્વતી ।
મેધાં મે અશ્વિનાવુભાવાધત્તાં પુષ્કરસ્રજા
42.1, internet version has puShkarasrajau ।
મેધાં દદાતુ મે શક્રો દત્તાં દેવી સરસ્વતી ।
ઉભાવપ્યશ્વિનૌ દેવૌ મહ્યં પ્રયચ્છતામ્ ॥ ૩૩૧॥

પદ્મમાલાસમાયુક્તૌ શિષ્ટં સ્પષ્ટાર્થમીરિતમ્ ।
ઇતિ ચત્વરિંશોऽનુવાકઃ
અપ્સરાસુ યા મેધા ગન્ધર્વેષુ ચ યન્મનઃ ।
દૈવી મેધા સરસ્વતી સ માં મેધા
સુરભિર્જુષતામ્ ॥

42.2

internet version has cha after apsarAsu svAhA here
યા મેધાસ્તિ સુરસ્ત્રીષુ ગન્ધર્વેષુ ચ યન્મનઃ ॥ ૩૩૨॥

મેધાત્મકં દેવનિષ્ઠા યા ચ મેધા મનુષ્યજા ।
મનુષ્યેષુ બહુજ્ઞેષુ સ્થિતા સા સકલા ચ મામ્ ॥ ૩૩૩॥

જુષતાં સેવતાં મેધા સર્વકામદુઘા સતી ।
ઇત્યેકચત્વરિંશોऽનુવાકઃ
આ માં મેધા સુરભિર્વિશ્વરૂપા હિરણ્યવર્ણા જગતી જગમ્યા ।
ઊર્જસ્વતી પયસા પિન્વમાના સા માં મેધા સુપ્રતીકા
જુષતામ્ ॥

43

મામાગચ્છતુ મેધેતિ ક્રિયાશ્યાહૃતિરિષ્યતે ॥ ૩૩૪॥

સુરભિઃ શુભગન્ધાઢ્યા યદ્વા કામદુઘા ભવેત્ ।
ક્ષમત્વાહ્બહુવિધાયા ધારણે બહુરૂપિણી ॥ ૩૩૫॥

સર્વગત્વાજ્જગદ્રૂપા જગમ્યા પુરુષાર્થિભિઃ ।
ભૃશં ગમ્યા બલવતી ક્ષીરાદિકરસેન મામ્ ॥ ૩૩૬॥

પિન્વમાના પ્રીણયન્તી સા તાદૃગ્ગુણસંયુતા ।

મેધા માં સુસુખી ભૂત્વા જુષતાં સેવતાં સદા ॥ ૩૩૭॥

editor: ઊર્જસ્વતીત્યસ્યાર્થો બલવતીતિ ।

ઇતિ દ્વિચત્વરિંશોઽધ્યાયઃ

સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમઃ ।

ભવે ભવે નાતિભવે ભવસ્વ મામ્ । ભવોદ્ભવાય નમઃ ॥

17

મેધાવિનો જ્ઞાનસિદ્ધ્યૈ કથ્યન્તે મન્ત્રસત્તમાઃ ।

સદ્યોજાતાભિધં વક્ત્રં પશ્ચિનં પરમેશિતુઃ ॥ ૩૩૮॥

તદ્રૂપં પરમેશાનં પ્રપદ્યામિ ભજામ્યહમ્ ।

નમોઽસ્તુ સદ્યોજાતાય પશ્ચિમાસ્યસ્વરૂપિણે ॥ ૩૩૯॥

તત્તજ્જન્મનિમિત્તં માં ન ભજસ્વ ન ચોદય ।

કિં તર્હ્યતિભવે દેવ જન્માતિક્રમસિદ્ધયે ॥ ૩૪૦॥

ભજસ્વ તત્ત્વજ્ઞાનાય માં પ્રેરય મહેશ્વર ।

ઇતિ ત્રિચત્વરિંશોઽધ્યાયઃ

વામદેવાય નમો જ્યેષ્ઠાય નમઃ રુદ્રાય

નમઃ કાલાય નમઃ કલવિકરણાય નમો બલવિકરણાય નમો

બલપ્રમથાય નમઃ સર્વભૂતદમનાય નમો

મનોન્મનાય નમઃ ॥

18

internet version sums more: shreShThAya namo before rudrAya,

balAya namo before balapramathAya

ઉદગ્વક્ત્રાત્મકો જ્ઞેયો વામદેવઃ પ્રકીર્તિતઃ ॥ ૩૪૧॥

તદ્વિગ્રહવિશેષાઃ સ્યુરેતે જ્યેષ્ઠદિનામકાઃ ।

વામદેવ્યાદિશક્તીનાં નવાનાં શિવપીઠકે ॥ ૩૪૨॥

પતયો નવ તેભ્યોઽપિ નમસ્કારોઽસ્તુ નિત્યશઃ ।

ઇતિ ચતુશ્ચત્વરિંશોઽધ્યાયઃ

અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ સર્વતઃ શર્વ

સર્વેભ્યો નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥

19

અઘોરણામકો દેવો દક્ષિણાસ્યાત્મકઃ શિવઃ ॥ ૩૪૩॥

તદ્વિગ્રહા અઘોરાઃ સ્યુઃ પ્રશાન્તાઃ સાત્વિકત્વતઃ ।
અન્યે તુ રાજસત્વેન ઘોરાઃ સ્યુરપરે પુનઃ ॥ ૩૪૪॥

ઘોરાદપિ ઘોરતરાસ્તામસત્વેન હેતુના ।
હે શર્વ રુદ્રરૂપેભ્ય સર્વેભ્યસ્તેભ્ય એવ ચ ॥ ૩૪૫॥

સર્વતઃ સર્વદેશેષુ સર્વદા નતિરસ્તુ નઃ ।
ઇતિ પઞ્ચચત્વરિંશોઽધ્યાયઃ
તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ । તન્નો રુદ્રઃ
પ્રચોદયાત્ ॥

20
અત્ર તત્પુરુષો નામ પ્રાગ્વક્ત્રાત્મક ઈરિતઃ ॥ ૩૪૬॥

દ્વિતીયાર્થે ચતુર્થી સ્યાત્તાદૃશં વિદ્મહે શિવમ્ ।
ગુરુશાસ્ત્રમુખાજ્જ્ઞાત્વા મહાદેવં ચ ધીમહિ ॥ ૩૪૭॥

ધ્યાયેમ તસ્માદ્રુદ્રો નઃ પ્રેરયત્વાત્મસંવિદે ।
ઇતિ ષટ્ચત્વરિંશોઽનુવાકઃ
ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનાં
બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ સદા શિવોમ્
21
ઊર્ધ્વવક્ત્રો મહાદેવો વેદશાસ્ત્રાદિકાશ્ચ યાઃ ॥ ૩૪૮॥

ચતુઃષષ્ટિકલાસ્તાસામીશાનઃ સ્યાન્નિયામકઃ ।
ઈશ્વરઃ સર્વભૂતાનાં નિયન્તા સર્વદેહિનામ્ ॥ ૩૪૯॥

વેદસ્યાપ્યધિકત્વેન પાલકો બ્રહ્મણસ્તથા ।
પ્રજાપતેરધિપતિર્બ્રહ્માખ્યઃ પરમેશ્વરઃ ॥ ૩૫૦॥

શિવો મમાનુગ્રહાય શાન્તો ભવતુ સર્વદા ।
સદાશિવોં સ એવાહં ભવામિ પરમેશ્વરઃ ॥ ૩૫૧॥

editor: ઓમ્ ; અહં ભવામીત્યર્થઃ
ઇતિ સપ્તચત્વરિંશોઽધ્યાયઃ
ઇત્થં પઞ્ચ બ્રહ્મમન્ત્રાઃ પઞ્ચવક્ત્રનિરૂપકાઃ ।
તત્ત્વધીહેતવઃ પ્રોક્તાસ્તજ્જ્ઞાનપ્રતિબન્ધકમ્ ॥ ૩૫૨॥

બ્રહ્મહત્યાદિ યત્પાપં તદ્વિનાશનહેતવઃ ।
ત્રિસુપર્ણાભિધા મન્ત્રા વક્ષ્યન્તે બોધસિદ્ધયે ॥ ૩૫૩॥

બ્રહ્મમેતુ મામ્ । મધુમેતુ મામ્ । બ્રહ્મમેવ મધુમેતુ મામ્ ।
યાસ્તે સોમ પ્રજા વત્સોઽભિ સો અહમ્ । દુઃષ્વપ્નહન્
દુરુષ્ષહ ।
યાસ્તે સોમ પ્રાણાँ સ્તાં જુહોમિ ।
ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ । બ્રહ્મહત્યાં વા
એતે ઘ્નન્તિ । યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં
પ્રાપ્નુવન્તિ ।
આ સહસ્રાત્પઙ્ક્તિં પુનન્તિ । ઓમ્ ॥

38
મામેતુ પરમં બ્રહ્મ મધુ માધુર્યસંયુતમ્ ।
પરમાનન્દરૂપં યન્મામવાપ્નોતુ વસ્તુ તત્ ॥ ૩૫૪॥

અત્યન્તમર્થભેદોઽસ્તિ ન બ્રહ્મમધુશબ્દયોઃ ।
અખણ્ડૈકરસં વસ્તુ મામેતુ પ્રતિપદ્યતામ્ ॥ ૩૫૫॥

editor: બ્રહ્મમેવેત્યાદિવાક્યસ્યાર્થમાહ—અત્યન્તમિત્યાદિના ।
યાસ્ત્યુમા બ્રહ્મવિદ્યાખ્યા તદ્યુક્ત પરમેશ્વર ।
તવ દેવમનુષ્યાદ્યાઃ પ્રજા યાઃ સન્તિ તા અપિ ॥ ૩૫૬॥

સોઽહં વત્સો બાલકઃ સ્યાં તાસાં મધ્યે હિ બાલવત્ ।
અહં ત્વત્કરણાયોગ્યસ્તસ્માત્સંસારઘાતક ॥ ૩૫૭॥

દુઃખં વિનાશયાત્યન્તં હે સોમ પરમેશ્વર ।
editor: શ્રુતૌ અભીતિ ; અભિલક્ષ્યેત્યર્થઃ । દુરુષ્વહ ;
દુઃખમુત્કર્ષેણાભિભવ ।
વર્ણવિકારશ્છાન્દસઃ । તદિદમાહ—દુઃખં
વિનાશયાત્યન્તમિતિ ।
તે પ્રાણવૃત્તયો યાઃ સ્યુસ્તદીયાસ્ત્વત્કૃતત્વતઃ ॥ ૩૫૮॥

જુહોમિ ત્વયિ તાન્ પ્રાણાન્મનો વાગાદયો હિ મે ।
ત્વયા વિનિર્મિતત્વેન ત્વદીયા એવ તાનતઃ ॥ ૩૫૯॥

ત્વય્યેવ સંહરામીશ વિષયેભ્યો નિરુધ્ય તાન્ ।
ત્વદેકચિત્તો ભૂયાસં તથૈવાનુગૃહાણ મામ્ ॥ ૩૬૦॥

ત્રિસુપર્ણસ્ય મન્ત્રસ્ય માહાત્મ્યં બ્રહ્મણોદિતમ્ ।
નાપૃષ્ટઃ કસ્યચિદ્ બ્રૂયાદિતિ શાસ્ત્રાનુસારતઃ ॥ ૩૬૧॥

કૃતાયાં શિષ્યયાચ્ઞાયાં પશ્ચાદ્વિદ્યોપદિશ્યતે ।
ઇમં તુ ત્રિસુપર્ણાખ્યં મન્ત્રં યાચ્ઞાં વિનૈવ ચ ॥ ૩૬૨॥

વિપ્રાયોપદિશેત્તેન હ્યુપદેશેન યે દ્વિજાઃ ।
ત્રિસુપર્ણં જપન્ત્યેતે ઘ્નન્તિ બ્રહ્મવધં દ્વિજાઃ ॥ ૩૬૩॥

તતઃ પાપેન રહિતાઃ સોમયોગં વ્રજન્તિ તે ।
ઉમાસહિતમીશાનં પ્રાપ્નુવન્તીતિ કિંચન ॥ ૩૬૪॥

યસ્યાં પઙ્ક્તૌ બ્રાહ્મણાનામુપવિષ્ટા ભવન્તિ તામ્ ।
સહસ્રદ્વિજપર્યન્તાં પઙ્ક્તિં શુદ્ધાં પ્રકુર્વતે ॥ ૩૬૫॥

તસ્માદોં પ્રણવાર્થોઽસ્ય પરમાત્મૈવ દેવતા
ત્રિસુપર્ણાખ્યમન્ત્રસ્યેત્યેવં મન્ત્રાર્થ ઈરિતઃ ॥ ૩૬૬॥

બ્રહ્મ મેધયા । મધુ મેધયા । બ્રહ્મમેવ મધુમેધયા ।
અદ્યાનો દેવ સવિતઃ પ્રજાવત્સાવીઃ સૌભગમ્ । પરા
દુઃષ્વપ્નિય઼ઁ સુવ । વિશ્વાનિ દેવ સવિતર્દુરિતાનિ
પરાસુવ । યદ્ભદ્રં તન્મ tanmama? આસુવ
મધુવાતા ઋતાયતે મધુક્ષરન્તિ સિન્ધવઃ । માધ્વીર્નઃ
સન્ત્વોષધીઃ । મધુ નક્તમુતોષસિ મધુમત્પાર્થિવ઼ઁ
રજઃ । મધુદ્યૌરસ્તુ નઃ પિતા । મધુમાન્નો
વનસ્પતિર્મધુમા઼ઁ
અસ્તુ સૂર્યઃ । માધ્વીર્ગાવો ભવન્તુ નઃ ।
ય ઇમં ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ ।
ભ્રૂણહત્યાં વા એતે ઘ્નન્તિ ।
યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં પ્રાપ્નુવન્તિ । આ
સહસ્રાત્પઙ્ક્તિં પુનન્તિ । ઓમ્ ॥

39 (appears twice in the book version)
ગુરૂપદિષ્ટવાક્યસ્ય તદર્થસ્ય ચ ધારણે ।

સ્યક્તિર્મેધા તયા બ્રહ્મ લભ્યતાં પરમેશ્વરઃ ॥ ૩૬૭॥

મધ્વિત્યાદિકવાક્યસ્ય વ્યાખ્યાનં પૂર્વવદ્ભવેત્ ।
અધેત્યાદ્યા ઋચઃ પઞ્ચ વ્યાખ્યાતાઃ પૂર્વમેવ ચ ॥ ૩૬૮॥

editor: પુર્વમેવ ; અણોરણીયાનિત્યનુવાક ઇત્યર્થઃ ।
વધો બ્રાહ્મણગર્ભસ્ય રાજગર્ભસ્ય વા ભવેત્ ।
ભ્રૂણહત્યાવશિષ્ટં તુ યથાપૂર્વં વિબુધ્યતામ્ ॥ ૩૬૯॥

ઇત્યેકોનપઞ્ચશોઽનુવાકઃ
બ્રહ્મ મેધવા । મધુ મેધવા । બ્રહ્મમેવ મધુ મેધવા ।
બ્રહ્મા દેવાનાં પદવીઃ કવીના-
મૃષિર્વિપ્રાણાં
મહિષો મૃગાણામ્ ।
શ્યેનો ગૃધ્રાણા૫્ँ સ્વધિતિર્વનાના૫્ँ
સોમઃ પવિત્રમત્યેતિ રેભન્ ॥

હ૫્ँ સઃ શુચિષદ્વસુરન્તરિક્ષસ-
દ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા
ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥

40.1, 2, 3
ય ઇમં ત્રિસુપર્ણમયાચિતં બ્રાહ્મણાય દદ્યાત્ ।
વીરહત્યાં વા એતે ઘ્નન્તિ ।
યે બ્રાહ્મણાસ્ત્રિસુપર્ણં પઠન્તિ । તે સોમં પ્રાપ્નુવન્તિ ।
આસહસ્રાત્ પઙ્ક્તિં પુનન્તિ । ઓમ્ ॥

40.6
i.v.: ya idaM tri ...
મેધશબ્દિતયજ્ઞોઽસ્યાસ્તીતિ મેધવદુચ્યતે ।
યજ્ઞાદિજન્યજ્ઞાનસ્ય બ્રહ્મણો વિષયત્વતઃ ॥ ૩૭૦॥

બ્રહ્મ મેધવદિત્યેતજ્જ્ઞેયં શેષં તુ પૂર્વવત્ ।
બ્રહ્મેત્યાદિ યદૃગ્દ્વન્દ્વં તદપિ વ્યાકૃતં પુરા ॥ ૩૭૧॥

વેદશાસ્ત્રપરિજ્ઞાતા તદનુષ્ઠાનતત્પરઃ ।

વિપ્રોઽભિષિક્તો રાજા વા વીરોઽન્યત્પૂર્વવદ્ભવેત્ ॥ ૩૭૨॥

બ્રહ્મહત્યાદિદોષા યે બ્રહ્મધીપ્રતિબન્ધકાઃ ।
ત્રિસુપર્ણાખ્યમન્ત્રાઃ સ્યુસ્તન્મહાપાતકાન્તકાઃ ॥ ૩૭૩॥

વિપ્રમાત્રવધસ્તત્ર બ્રહ્મહત્યા તતોઽધિકા ।
ભ્રૂણહત્યા વીરહત્યા તસ્યા અપ્યધિકા સ્મૃતા ॥ ૩૭૪॥

ત્રિસુપર્ણાખ્યમન્ત્રાણાં યાવજ્જીવયપાન્નૃણામ્ ।
અપ્યેતાદૃશપાપાનાં વિનિવૃત્તિર્ભવેદ્ ધ્રુવમ્ ॥ ૩૭૫॥

સુરાપાનાદિપાપાનાં નિવૃત્તિરિતિ કા કથા ।
editor: પાપાનામ્ ; પાતકાનામિત્યર્થઃ ।
ઇતિ પઞ્ચાશોઽનુવાકઃ
footnote  ઇતઃ પરમેકષષ્ટિતમાનુવાકપર્યન્તં ન વિવૃતમ્ ।
footnote  યદ્યપીત આરભ્ય ' ન્યાસ એવાત્યરેચયદ્ય એવં
વેદેત્યુપનિષત્'
ઇત્યન્તમેકં વાક્યં, તથાપિ વિવૃતસૌકર્યાય ખણ્ડશો વિભજ્ય
નિર્દિષ્ટમ્ ।
સત્યં પરં પરઁ સત્યઁ સત્યેન ન
સુવર્ગાલ્લોકાચ્ચ્યવન્તે
કદાચન સતાઁ હિ સત્યં તસ્માત્સત્યે રમન્તે
78.1
નરસ્ય જ્ઞાનયોગ્યસ્ય મહાપાપાદિનાશતઃ ॥ ૩૭૬॥

પરમેત્કૃષ્ટતાં વક્તું ન્યાસસ્ય જ્ઞાનહેતુષુ ।
સત્યાદ્યેકાદશોત્કૃષ્ટા વક્તવ્યા જ્ઞાનહેતવઃ ॥ ૩૭૭॥

editor: નરસ્ય વક્તવ્યા ઇત્યન્વયઃ । પ્રતિયોગિત્વેનેતિ શેષઃ ।
પ્રથમં સાધનં તત્ર સત્યમત્ર નિરૂપ્યતે ।
યથાદૃષ્ટં પ્રમાણેન તથોક્તિઃ સત્યમુચ્યતે ॥ ૩૭૮॥

પુમર્થહેતુષૂત્કૃષ્ટં પરં તચ્ચ પ્રકીર્તિતમ્ ।
તત્રાદરાર્થં ભૂયશ્ચ પરં સત્યમિતીરિતમ્ ॥ ૩૭૯॥

યદ્વા યથા પરં બ્રહ્માબાધ્યં સત્યમિદં તથા ।
વ્યાવહારિકબાધસ્ય રાહિત્યેન પ્રકૃષ્ટતામ્ ॥ ૩૮૦॥

વિવક્ષિત્વા પરં સત્યમિતિ દૃષ્ટાન્તતઃ સ્મૃતમ્ ।
યાવજ્જીવં યથાર્થોક્ત્યા સ્વર્ગલોકાત્કદાચન ॥ ૩૮૧॥

ન પ્રચ્યુતાઃ સ્યુરન્યે તુ સ્વર્ગં પ્રાપ્યાપિ પુણ્યતઃ ।
અનૃતપ્રોક્તિદોષેણાનનુભૂયૈવ કર્મણઃ ॥ ૩૮૨॥

ફલં પૂર્નતયા સ્વર્ગાચ્ચ્યવન્તેઽનૃતવાદિનઃ ।
યથાર્થવચનં યસ્માત્સતાં સન્માર્ગવર્તિનામ્ ॥ ૩૮૩॥

સંબન્ધિ તસ્માત્કેચિત્તુ સતામિદમિતિ શ્રુતેઃ ।
editor: શ્રુતેઃ ; વ્યુત્પત્તેરિત્યર્થઃ ।
ઉત્કૃષ્ટહેતુર્મોક્ષસ્ય સત્યોક્તિરિતિ વાદિનઃ ॥ ૩૮૪॥

સત્યે રમન્તે ક્રીડન્તે તસ્મિન્નેવ મનીષિણઃ ।
editor: ઇતિ વાદિનઃ કેચિન્મનીષિણઃ તસ્મિન્નેવ સત્યે રમન્ત ઇત્યન્વયઃ ।
મોક્ષસ્યેતિ ; મોક્ષહેતુજ્ઞાનસ્ય હેતુરિત્યર્થઃ । એવમગ્રેઽપિ ।
તપ ઇતિ તપો નાનશનાત્પરં યદ્ધિ પરં તપસ્તદ્
દુર્ધર્ષં તદ્ દુરાધષ તસ્માત્તપસિ રમન્તે
78.2
એકં મતં કીર્તયિત્વા દ્વિતીયં મતમુચ્યતે ॥ ૩૮૫॥

તપઃ પરં મોક્ષહેતુરિતિ કેચિત્પ્રચક્ષતે ।
તીર્થયાત્રાજપાદીનિ તપાંસ્યન્યાનિ ભૂરિશઃ ॥ ૩૮૬॥

તથાપ્યનશનં તેષુ સમસ્તેષુ પરં ભવેત્ ।
ઉપવાસાદનશનાન્ન પરં વિદ્યતે તપઃ ॥ ૩૮૭॥

કૃચ્છ્રાદિકં યત્તપોઽસ્તિ તત્સોઢું શક્યમેવ ન ।
અત એવ દુરાધર્ષમાસમન્તાચ્છરીરિણામ્ ॥ ૩૮૮॥

તસ્ય સોઢુમશક્યત્વં સર્વેષામનુભૂયતે ।
તસ્માત્કેચિદ્રમન્તેઽસ્મિન્ કૃચ્છ્રચાન્દ્રાયણદિકે ॥ ૩૮૯॥

editor: તસ્ય ; તપસ ઇત્યર્થઃ ।
દમ ઇતિ નિયતં બ્રહ્મચારિણસ્તસ્માદ્દમે રમન્તે
78.3
દમો વાહ્યેન્દ્રિયાણાં સ્યાદ્વિષયેભ્યો નિવર્તતમ્ ।
સ એવ મુક્તિહેતુઃ સ્યાદિતિ નૈષ્ઠકવર્ણિનઃ ॥ ૩૯૦॥

મન્યન્તે સર્વદા તસ્માદ્રમન્તે દમ એવ તે ।
શમ ઇત્યરણ્યે મુનસ્તમાચ્છમે રમન્તે
78.4
ક્રોધાદિદોષરાહિત્યં મનસઃ શમ ઉચ્યતે ॥ ૩૯૧॥

સ એવ મુક્તિહેતુઃ સ્યાદિત્યરણ્યનિવાસિનઃ ।
મન્યન્તે મુનયસ્તસ્માદ્રમન્તે શમ એવ તે ॥ ૩૯૨॥

દાનમિતિ સર્વાણિ ભૂતાનિ પ્રશꣳસન્તિ દાનાન્નાતિદુષ્કરં
તસ્માદ્દાને રમન્તે
78.5
સ્વીયાનાં ભૂગવાદીનાં શાસ્ત્રપ્રોક્તેન વર્ત્મના ।
સ્વસ્વસ્ય ત્યાગપૂર્વં યત્પરસ્વત્વપ્રસઞ્જનમ્ ॥ ૩૯૩॥

તદ્દાનમેવ પરમં મત્વા મોક્ષસ્ય સાધનમ્ ।
સ્તુવન્તિ સકલા દાનાદત્યન્તં નાસ્તિ દુષ્કરમ્ ॥ ૩૯૪॥

દૃશ્યન્તે ધનરક્ષાર્થં ત્યજન્તોऽસૂનપિ પ્રિયાન્ ।
તસ્માદ્ગોભૂહિરણ્યાદેર્દાને સક્તિં પ્રકુર્વતે ॥ ૩૯૫॥

ધર્મ ઇતિ ધર્મેણ સર્વમિદં પરિગૃહીતં
ધર્માન્નાતિદુશ્ચરં તસ્માદ્ધર્મે રમન્તે
78.6
સ્મૃત્યાદ્યુક્તં તટાકાદેર્નિર્માણં ધર્મ ઉચ્યતે ।
સ એવ મુક્તિહેતુઃ સ્યાદિતિ રાજાદયો નરાઃ ॥ ૩૯૬॥

મન્યન્તે તેન ધર્મેણ ગૃહીતં સકલં જગત્ ।
તુષ્યન્તિ સ્નાનપાનાદ્યૈર્નરપક્ષિમૃગાદયઃ ॥ ૩૯૭॥

નૈવાસ્તિ દુશ્ચરં તસ્માત્પ્રભવોऽસ્મિન્ રતાસ્તતઃ ।
પ્રજન ઇતિ ભૂયાꣳસસ્તસ્માદ્ભૂયિષ્ઠાઃ પ્રજાયન્તે
તસ્માદ્ભૂયિષ્ઠાઃ પ્રજનને રમન્તે
78.7
પ્રજનં તનયાદીનામુત્પાદનમિતીર્યતે ॥ ૩૯૮ ।
તસ્યૈવોત્તમહેતુત્વં મન્યન્તે બહવો જનાઃ ।
દરિદ્રૈર્ધનિકૈઃ શિષ્ટૈરશિષ્ટૈશ્ચ પ્રવૃત્તિતઃ ॥ ૩૯૯॥

editor: પ્રવૃત્તિતઃ ; પુત્રાદ્યુત્પાદન ઇતિ શેષઃ ।
તસ્માદેકૈકલોકસ્ય યાજન્તે બહવઃ પ્રજાઃ
તસ્માદ્રમન્તે બહવઃ પુત્રાદ્યુત્પાદને નરાઃ ॥ ૪૦૦॥

અગ્નય ઇત્યાહ તસ્માદગ્નય આધાતવ્યા
78.8
અગ્નયો ગાર્હપત્યાદ્યાઃ પરમા મુક્તિહેતવઃ ।
ઇત્યાહ વૈદિકઃ કશ્ચિત્તસ્માદ્ધેતોર્ગૃહસ્થિતૈઃ ॥ ૪૦૧॥

અગ્નયો ગાર્હપત્યાદ્યા આધાતવ્યા ભવન્તિ તે ।
editor: વૈદિકઃ , વેદાર્થપરઃ । ગૃહસ્થિતૈઃ ; ગૃહસ્થૈરિત્યર્થઃ ।
અગ્નિહોત્રમિત્યાહ તસ્માદગ્નિહોત્રે રમન્તે
78.9
આહિતેઽગ્નાવનુષ્ઠેયો હોમઃ સ્યાદગ્નિહોત્રકમ્ ॥ ૪૦૨॥

તદુત્તમં મુક્તિહેતુરિતિ કશ્ચન વૈદિકઃ ।
આહ તસ્માદગ્નિહોત્રે રમન્તે ગૃહિણઃ સદા ॥ ૪૦૩॥

યજ્ઞ ઇતિ યજ્ઞેન હિ દેવા દિવં ગતાસ્તસ્માદ્યજ્ઞે રમન્તે
78.10
જ્યોતિષ્ટામાદિકો યજ્ઞઃ પરમો મોક્ષસાધનમ્ ।
ઇતિ કેચન મન્યન્તે વેદાર્થાસક્તમાનસાઃ ॥ ૪૦૪॥

યસ્માદાધુનિકા દેવાઃ પૂર્વાનુષ્ઠિતયજ્ઞતઃ ।
સ્વર્ગલોકં ગતાસ્તસ્માદ્યજ્ઞે કેચિદ્ બુધા રતાઃ ॥ ૪૦૫॥

માનસમિતિ વિદ્વાઁ સસ્તસ્માદ્વિદ્વાઁ સ એવ માનસે રમન્તે
78.11
વિદ્વાંસઃ સગુણજ્ઞાઃ સ્યુર્મનઃસાધ્યં તુ માનસમ્ ।
ઉપાસનં પરં હેતુરિત્યેતે મેનિરે બુધાઃ ॥ ૪૦૬॥

editor: બુધાઃ ; સગુણબ્રહ્મવિદ ઇત્યર્થઃ ।
તસ્માત્માનસ એવૈકે સમાસક્તા મનીષિણઃ ।
વૈદિકોપાસ્તિભાગસ્ય તાત્પર્યજ્ઞાનશાલિનઃ ॥ ૪૦૭॥

ન્યાસ ઇતિ બ્રહ્મા બ્રહ્મા હિ પરઃ પરો હિ બ્રહ્મા તાનિ વા
એતાન્યવરાણિ તપાઁ સિ ન્યાસ એવાત્યરેચયત્

78.12
વૈધાનાં કર્મણાં ત્યાગો વિધિના ન્યાસ ઉચ્યતે ।
ન્યાસ એવોત્તમો મુક્તેર્હેતુઃ સ્યાદિતિ મન્યતે ॥ ૪૦૮॥

બ્રહ્મા હિરણ્યગર્ભોઽયં સ બ્રહ્મા પર એવ હિ ।
ન તુ જીવો યથા તતન્મતજ્ઞૈઃ પ્રાક્ સમીરિતઃ ॥ ૪૦૯॥

યદ્યપ્યસૌ દેહધારી તથાપિ પર એવ હિ ।
તત્સમાનજ્ઞાનવત્ત્વાત્તચ્છિષ્યત્વેન હેતુના ॥ ૪૧૦॥

સત્યાદીનિ તપાંસ્યેવ નિકૃષ્ટાનિ તથાપ્યતઃ ।
editor: તથાપિ ન્યાસાન્નિકૃષ્ટા ઇત્યર્થઃ ।
સંયાસ એવ સર્વાણિ તાન્યતિક્રાન્તવાનયમ્ ॥ ૪૧૧॥

આધિક્યતારતમ્યં ચ તત્ર વિશ્રાન્તમિષ્યતે ।
ય એવં વેદેત્યુપનિષત્ ॥

ઉપસંહરતીદાનીમુક્તમુત્તમસાધનમ્ ॥ ૪૧૨॥

સર્વેભ્યઃ સાધન્વેભ્યશ્ચ સંન્યાસસ્ય પ્રકૃષ્ટતામ્ ।
યો વેદ તસ્ય વિદુષ ઇત્યેવં પરિકીર્તિતા ॥ ૪૧૩॥

વિદ્યા રહસ્યરૂપા સ્યાદિત્યર્થઃ સદ્ભિરીરિતઃ ।
ઇતિ દ્વિષષ્ટતમોઽનુવાકઃ
પ્રાજાપત્યો હારુણિઃ સુપર્ણેયઃ પ્રજાપતિં પિતરમુપસસાર કિં
ભગવન્તઃ પરમં વદન્તીતિ તસ્મૈ પ્રોવાચ
79.1
પ્રાગુક્તમોક્ષહેત્વર્થમુપપાદયિતું શ્રુતિઃ ॥ ૪૧૪॥

આખ્યાયિકાં પ્રવક્તયેષા ગુરુશિષ્યોક્તિગર્ભિણીમ્ ।
આરુણ્યાખ્યઃ સુપર્ણાયાસ્તનયશ્ચ પ્રજાપતેઃ ॥ ૪૧૫॥

ગુરૂપસદનં ચક્રે પપ્રચ્છ તદનન્તરમ્ ।
પૂજ્યા મહર્ષયો મુક્તેઃ સાધનેષ્વખિલેષુ ચ ॥ ૪૧૬॥

કિમુત્કૃષ્ટં વદન્તીતિ તસ્મૈ ગુરુરુવાચ સઃ ।
સત્યેન વાયુરાવાતિ સત્યેનાદિત્યો રોચતે દિવિ સત્યં વાચઃ
પ્રતિષ્ઠા સત્યે સર્વં પ્રતિષ્ઠિતં તસ્માત્સત્યં પરમં
વદન્તિ

79.2
સાધનેષુ તદુક્તેષુ પ્રથમં વક્તિ સાધનમ્ ॥ ૪૧૭॥

યોઽન્તરિક્ષેઽધુના વાતિ સ વાયુઃ પૂર્વજન્મનિ ।
હરઃ સન્સત્યવાદિત્વં પરિપાલ્યૈવ સત્યતઃ ॥ ૪૧૮॥

સમ્પ્રાપ્ય વાયુદેવત્વં લોકાનુગ્રહવાઞ્છયા ।
સદા ચરતિ સૂર્યોઽપિ પૂર્વાનુષ્ઠિતસત્યતઃ ॥ ૪૧૯॥

દિવિ પ્રકાશતે સત્યં પ્રતિષ્ઠા વાચ ઉચ્યતે ।
વાચોક્તમનૃતં ત્વન્યૈર્નિરાક્રિયત ઇત્યતઃ ॥ ૪૨૦॥

પ્રતિષ્ઠા ન હિ વાચઃ સ્યાત્સત્યે સર્વં પ્રતિષ્ઠિતમ્ ।
સમસ્તવ્યવહારોઽપિ સત્યવાચિ પ્રતિષ્ઠિતઃ ॥ ૪૨૧॥

તસ્માત્કેચિત્સત્યમેવ પ્રકૃષ્ટં સાધનં જગુઃ ।
editor: અતોઽનૃતં ન હિ વાચઃ પ્રતિષ્ઠેત્યન્વયઃ ।
તપસા દેવા દેવતામગ્ર આયન્ તપસાર્ષયઃ
સુવરન્વવિન્દન્તપસા
સપત્નાન્પ્રણુદામારાતીસ્તપસિ સર્વં પ્રતિષ્ઠિતં
તસ્માત્તપઃ પરમં વદન્તિ
79.3
તત્રાસંતુષ્ટતાં દૃષ્ટ્વા દ્વિતીયં પ્રાહ સાધનમ્ ॥ ૪૨૨॥

editor: મુખવિકાસરાહિત્યલક્ષણમપરિતોષમારુણેર્દૃષ્ટ્વેત્યર્થઃ ।
દેવા દેવત્વમધુના સમ્પ્રાપ્તાઃ પૂર્વજન્મનિ ।
અનુષ્ઠિતેન તપસા કૃચ્છ્રચાન્દ્રાયણાદિના ॥ ૪૨૩॥

પૂર્વાર્જિતેન તપસા સ્વર્ગં પ્રાપ્તા મહર્ષયઃ ।
વયં ચ તપસા શત્રૂન્ દ્રવ્યલાભવિરોધિનઃ ॥ ૪૨૪॥

નરાંશ્ચાત્ર નિરાકુર્મઃ સમસ્તં તપસિ સ્થિતમ્ ।
તસ્માદ્વદન્ત્યનશનં પરમં મોક્ષસાધનમ્ ॥ ૪૨૫॥

editor: તપસેતિ ; અભિચારરૂપતપસેત્યર્થઃ ।
દમેન દાન્તાઃ કિલ્બિષમવધૂન્વન્તિ દમેન બ્રહ્મચારિણઃ
સુવરગચ્છન્ દમો ભૂતાનાં દુરાધર્ષં દમે સર્વં
પ્રતિષ્ઠિતં તસ્માદ્દમઃ પરમં વદન્તિ

79.4

પૂર્વત્રાપરિતોષેણ સાધનાન્તરમુચ્યતે ।

દુઃશકં સર્વતઃ સોઢું દુરાધર્ષં દમો ભવેત્ ॥ ૪૨૬ ॥

અપેક્ષતં ફલં સર્વં દમ એવ પરિષ્ઠિતમ્ ।

શમેન શાન્તાઃ શિવમાચરન્તિ શમેન નાકં

મુનયોઽન્વવિન્દઞ્છમો

ભૂતાનાં દુરાધર્ષં શમે સર્વં પ્રતિષ્ઠિતં

તસ્માચ્છમઃ પરમં વદન્તિ

79.5

ક્રોધાદિરહિતાશ્ચિત્તે પુમર્થં પ્રાપ્નુયુર્નરાઃ ॥ ૪૨૭ ॥

શમેન સ્વર્ગમગમન્નારદાદ્યા મુનીશ્વરાઃ ।

દાનં યજ્ઞાનાં વરૂથં દક્ષિણા લોકે દાતારꣳ

સર્વભૂતાન્યુપજીવન્તિ દાનેનારાતીરપાનુદન્ત દાનેન

દ્વિષન્તો મિત્રા ભવન્તિ દાને સર્વં પ્રતિષ્ઠિતં તસ્માદ્દાનં

પરમં વદન્તિ

79.6

ગોહિરણ્યાદિદાનં સ્યાદ્યજ્ઞાનાં દક્ષિણા તતઃ ॥ ૪૨૮ ॥

શ્રેષ્ઠં લોકેઽપિ દાતારં વેદશાસ્ત્રવિદો જનાઃ ।

મૂઢાશ્ચૈવોપજીવન્તિ ભટાનાં ધનદાનતઃ ॥ ૪૨૯ ॥

નૃપાઃ શત્રૂન્નિરાચક્રુઃ પ્રબલા યે દ્વિષન્તિ તે ।

ધનદાનેન સંતુષ્ટા ભવન્તિ સુહૃદો જનાઃ ॥ ૪૩૦ ॥

ધર્મો વિશ્વસ્ય જગતઃ પ્રતિષ્ઠા લોકે ધર્મિષ્ઠ પ્રજા

ઉપસર્પન્તિ ધર્મેણ પાપમપનુદતિ ધર્મે સર્વં પ્રતિષ્ઠિતં

તસ્માદ્ધર્મં પરમં વદન્તિ

79.7

તટાકાદિકનિર્માણં ધર્મ ઇત્યેવમીરિતમ્ ।

સ સર્વપ્રાણિજાતસ્ય પ્રતિષ્ઠા શ્રેય ઉચ્યતે ॥ ૪૩૧ ॥

ઉપજીવન્તિ ધર્મિષ્ઠં લોકે સર્વાઃ પ્રજા નરાઃ ।

ધર્માધર્મવિવેકાર્થમુપગચ્છન્તિ સર્વશઃ ॥ ૪૩૨ ॥

પ્રાયશ્ચિત્તેન ધર્મેણ નાશયન્તિ ચ કિલ્બિષમ્ ।

પ્રજનનં વૈ પ્રતિષ્ઠા લોકે સાધુ પ્રજાયાસ્તન્તું તન્વાનઃ
પિતૃણામનુણો ભવતિ  તદેવ તસ્યાનૃણં તસ્માત્પ્રજનનં
પરમં વદન્તિ
79.8
પુત્રોત્પાદનમેવેદં પ્રતિષ્ઠા ગૃહિનાં ભવેત્ ॥ ૪૩૩॥

ગૃહકૃત્યસ્ય નિર્વોઢા પુત્ર એવ ન હીતરઃ ।
જય્યો મનુષ્યલોકોઽયં પુત્રેણૈવેતિ હિ શ્રુતિઃ ॥ ૪૩૪॥

પુત્રપૌત્રાદિરૂપા સ્યાત્પ્રજા તસ્યાઃ પરંપરામ્ ।
યથાશાસ્ત્રં વિતન્વાનઃ પિતૃણામનૃણો ભવેત્ ॥ ૪૩૫॥

ઋણં તદીયંપુત્રેણ સમ્યક્પ્રત્યર્પિતં ભવેત્ ।
પુત્રોત્પાદનમેવ સ્યાદૃણાપાકરણં પિતુઃ ॥ ૪૩૬॥

અગ્નયો વૈ ત્રયી વિદ્યા દેવયાનઃ પન્થા ગાર્હપત્ય ઋક્
પૃથિવી રથન્તરમન્વાહાર્યપચનઃ યજુરન્તરિક્ષં
વામદેવ્યમાહવનીયઃ સામ સુવર્ગો લોકો બૃહત્તસ્માદગ્નીન્
પરમં વદન્તિ
79.9
ત્રયોઽગ્નયસ્ત્રયી વિદ્યા વેદૈકવિહિતત્વતઃ ।
વેદત્રયોક્તકર્માણિ યાનિ તત્સાધનત્વતઃ ॥ ૪૩૭॥

દેવત્વપ્રાપકો માર્ગો યાગદ્વારેણ કીર્તિતઃ ।
કિંચાયં ગાર્હપત્યોઽગ્નિરૃગ્વેદાત્મક ઈરિતઃ ॥ ૪૩૮॥

પૃથ્વીલોકસ્વરૂપશ્ચ યદ્રથન્તરસામ તત્ ।
editor: સામેતિ ; સામાત્મક ઇત્યર્થઃ ।
દક્ષિનાગ્નિર્યજુર્વેદશ્ચાન્તરિક્ષાત્મકઃ સ્મૃતઃ ॥ ૪૩૯॥

વામદેવાખ્યસામાત્મા ભવતીતિ પ્રશસ્યતે ।
સામદેવઃ સ્વર્ગલોકો બૃહત્સામેતિ યત્ ત્રયમ્ ॥ ૪૪૦॥

તદાત્માહવનીયઃ સ્યાદિત્યસૌ ચ પ્રશસ્યતે ।
અગ્નિહોત્રँ સાયં પ્રાતર્ગૃહાણાં નિષ્કૃતિઃ સ્વિષ્ટँ
સુહુતં યજ્ઞક્રતૂનાં પ્રાયણँ સુવર્ગસ્ય લોકસ્ય
જ્યોતિસ્તસ્માદગ્નિહોત્રં પરમં વદન્તિ

79.10
અગ્નિહોત્રં કૃતં સાયં પ્રાતશ્ચ ગૃહનિષ્કૃતિઃ ॥ ૪૪૧॥

અગ્નિહોત્રસ્ય વિરહે ક્ષુધિતોऽગ્નિર્ગૃહાન્દહેત્ ।
ત્રયસાધનમૂલ્યં તુ નિષ્કૃતિઃ પરિકીર્ત્યતે ॥ ૪૪૨॥

યાગો દ્રવ્યપરિત્યાગો દેવમુદ્દિશ્ય કીર્તિતઃ ।
તત્તદ્દ્રવ્યસ્ય દહને પ્રક્ષેપો હોમ ઉચ્યતે ॥ ૪૪૩॥

યજ્ઞાનાં ચ ક્રતૂનાં ચ પ્રારમ્ભકમિદં સ્મૃતમ્ ।
અત એવાગ્નિહોત્રં સ્યાત્સ્વર્ગલોકપ્રકાશકમ્ ॥ ૪૪૪॥

editor: અગ્ન્યાધેયમગ્નિહોત્રં દર્શપૂર્ણમાસાવાગ્રયણં ચાતુર્માસ્યાનિ
નિરૂઢપશુબન્ધઃ
સૌત્રામપિ ચેતિ સપ્ત હવિર્યજ્ઞાઃ । ક્રતુશબ્દો યૂપવસ્તુ
સોમયાગેષુ રૂઢઃ ।
અગ્નિષ્ટોમોऽત્યગ્નિષ્ટોમ ઉક્થ્યઃ ષોડશી
વાયપેયોऽતિરાત્રોऽપ્તોર્યામશ્ચેતિ સપ્ત
સોમસંસ્થાઃ ક્રતવઃ ।
યજ્ઞ ઇતિ યજ્ઞો હિ દેવાનાં યજ્ઞેન હિ દેવા દિવં ગતા
યજ્ઞેનાસુરાનપાનુદન્ત યજ્ઞેન દ્વિષન્તો મિત્રા ભવન્તિ યજ્ઞે
સર્વં પ્રતિષ્ઠિતં તસ્માદ્યજ્ઞં પરમં વદન્તિ
79.11
ઉત્તમં સાધનં યજ્ઞ ઇતિ કેચિત્પ્રચક્ષતે ।
યજ્ઞઃ પ્રિયો હિ દેવાનાં તે હિ દેવા દિવં ગતાઃ ॥ ૪૪૫॥

પૂર્વાનુષ્ઠિતયજ્ઞેન સ્વર્ગલોકં પ્રપેદિરે ।
જ્યોતિષ્ટોમેન યજ્ઞેન સર્વકામાપ્તિહેતુના ॥ ૪૪૬॥

દ્વિષત્પ્રશાન્તિકામસ્ય નિત્રાઃ સ્યુર્દ્વેષકારિણઃ ।
માનસં વૈ પ્રાજાપત્યં પવિત્રં માનસેન મનસા સાધુ
પશ્યતિ ઋષયઃ પ્રજા અસૃજન્ત માનસે સર્વં પ્રતિષ્ઠિતં
તસ્માન્માનસં પરમં વદન્તિ
79.12
પ્રાજાપત્યપદપ્રાપ્તેઃ સાધનં સ્યાદુપાસનમ્ ॥ ૪૪૭॥

અત એવ પવિત્રં સ્યાચ્છુદ્ધિહેતુત્વકારણાત્ ।

ઉપસનેન યુક્તં યત્તેનૈપાગ્રેણ ચેતસા ॥ ૪૪૮॥

સાક્ષાત્કરોતિ યોગીશઃ સમ્યગ્વ્યવહિતાદિકમ્ ।
અતીતાનાગતં તચ્ચ યોગશાસ્ત્રે પ્રપઞ્ચિતમ્ ॥ ૪૪૯॥

એકાગ્રમનસા યુક્તા વિશ્વામિત્રાદયઃ પ્રજા ।
બહ્વિઃ સંકલ્પમાત્રેણ સૃષ્ટન્તો મહર્ષયઃ ॥ ૪૫૦॥

ન્યાસ ઇત્યાહુર્મનીષિણો બ્રહ્માણમ્
79.13 /1
યો મોક્ષહેતુઃ સંન્યાસ ઇત્યુક્તસ્તં મહર્ષયઃ ।
હિરણ્યગર્ભમેવાહુઃ સુધિયઃ સ્મૃતિકારિણઃ ॥ ૪૫૧॥

સંન્યાસાદ્બ્રહ્મણઃ સ્થાનમિતિ હિ સ્મર્યતે બુધૈઃ ।
તત્પ્રાપ્તેરન્તરઙ્ગત્વાદસ્ય તદ્રૂપતોદિતા ॥ ૪૫૨॥

editor: અન્તરઙ્ગત્વાદિતિ ; અન્તરઙ્ગસાધનત્વાદિત્યર્થઃ ।
બ્રહ્મા વિશ્વઃ કતમઃ સ્વયમ્ભૂઃ પ્રજાપતિઃ સંવત્સર ઇતિ
79.13 /2
સ્તોતું તમેવ સંન્યાસં તત્સમ્પ્રાપ્યં પ્રપઞ્ચ્યતે ।
editor: તત્ ; હિરણ્યગર્ભસ્વરૂપમિત્યર્થઃ ।
હિરણ્યગર્ભો વિશ્વઃ સ્યાત્સમસ્તજગદાત્મકઃ ॥ ૪૫૩॥

અતીવ સુખરૂપશ્ચ માત્રાદિરહિતત્વતઃ ।
સ્વયમેવ સનુત્પન્નઃ પ્રજાનાં પરિપાલકઃ ॥ ૪૫૪॥

કાલાત્મા ચેતિશબ્દસ્તુ પ્રદર્શનપરઃ સ્મૃતઃ ।
ઇત્યાદિસર્વરૂપત્વમુન્નેયમિતિ મન્યતામ્ ॥ ૪૫૫॥

સંવત્સરોઽસાવાદિત્યો ય એષ આદિત્યે પુરુષઃ
સ પરમેષ્ઠી બ્રહ્માત્મા
79.14
સંવત્સરસ્ય માહાત્મ્યં સૂત્રાઙ્ગસ્ય પ્રદર્શ્યતે ।
ભૂસ્તસ્ય પ્રકૃષ્ટ ન્યાસસ્ય સ્તુતયેઽધુન ॥ ૪૫૬॥

editor: સૂત્રેતિ ; હિરણ્યગર્ભાવયવસ્યેત્યર્થઃ ।
યોઽયં સંવત્સરઃ કાલઃ સોઽસાવાદિત્ય એવ હિ ।
આદિત્યગમનાવૃત્ત્યા તસ્ય સમ્પાદિતત્વતઃ ॥ ૪૫૭॥

આદિત્યમણ્ડલે યોઽયં પુરુષો વર્તતે સ ચ ।
હિરણ્યગર્ભરૂપઃ સ્યાન્મણ્ડલદ્વારતો હ્યયમ્ ॥ ૪૫૮॥

હિરણ્યગર્ભઃ પ્રાપ્યઃ સ્યાત્સ બ્રહ્મ પરમં ભવેત્ ।
તથૈવ પ્રત્યગાત્મા સ્યાદિત્યર્થઃ પરિકીર્તિતઃ ॥ ૪૫૯॥

યાભિરાદિત્યસ્તપતિ રશ્મિભિસ્તાભિઃ પર્જન્યો વર્ષતિ
પર્જન્યેનૌષધિવનસ્પતયઃ પ્રજાયન્ત ઓષધિવનસ્પતિભિરન્નં
ભવત્યન્નેન પ્રાણાઃ પ્રાણૈર્બલં બલેન તપસ્તપસા શ્રદ્ધા
શ્રદ્ધયા મેધા મેધયા મનીષા મનીષયા મનો મનસા
શાન્તિઃ શાન્ત્યા ચિત્તં ચિત્તેન સ્મૃતિઃ સ્મૃત્યા સ્મારꣳ
સ્મારેણ વિજ્ઞાનં વિજ્ઞાનેનાત્માનં વેદયતિ તસ્માદન્નં
દદન્સર્વાણ્યેતાનિ દદાત્યન્નાત્પ્રાણા ભવન્તિ ભૂતાનાં
પ્રાણૈર્મનો મનસશ્ચ વિજ્ઞાનં વિજ્ઞાનાદાનન્દો બ્રહ્મયોનિઃ
79.15
સંવત્સરં પ્રશસ્યૈવં સૂર્યાદિદ્વારતસ્તતઃ ।
સમસ્તવ્યવહારાય મણ્ડલદ્વારતો રવેઃ ॥ ૪૬૦॥

હેતુત્વેન સ એવાયં હાયનોઽત્ર પ્રશસ્યતે ।
editor: સ એવાયં સંવત્સરઃ આદિત્યમણ્ડલદ્વારા
સર્વવ્યવહારહેતુતયા સ્તૂયત ઇત્યર્થઃ ।
યાભિરુષ્ણસ્વરૂપાભિરર્કસ્તપતિ રશ્મિભિઃ ॥ ૪૬૧॥

તાભિર્ભૂજલમાદાય મેઘો ભૂત્વા પ્રવર્ષતિ ।
બ્રીહ્યાદિરોષધિર્જ્ઞેયા પનસાદિર્વનસ્પતિઃ ॥ ૪૬૨॥

બ્રીહ્યાદિભિર્ભવેદ્ભોજ્યં પ્રાણાસ્તૃપ્યન્તિ ભોજ્યતઃ ।
પ્રાણૈર્દેહબલં તેન તપઃ કૃચ્છ્રાદિલક્ષણમ્ ॥ ૪૬૩॥

તપસા શુદ્ધચિત્તસ્ય શ્રદ્ધા બ્રહ્માત્મવેદને ।
શ્રદ્ધયૈકાગ્રચિત્તસ્ય શક્તિર્ગ્રન્થાર્થધારણે ॥ ૪૬૪ ।
મેધયા તત્ત્વબુદ્ધ્યાખ્યા મનીષા સ્યાન્મનીષયા ।
મનોનિરન્તરત્વેન મનનં જાયતે તતઃ ॥ ૪૬૫॥

ક્રોધાદ્યવસરાભાવાચ્છન્તિઃ શાન્ત્યા પ્રમાનજમ્ ।
તત્ત્વજ્ઞાનાભિધં ચિત્તં તેન ચિત્તેન સર્વદા ॥ ૪૬૬॥

નિદ્રાદિવ્યવધાનેઽપિ લભતે તત્ત્વસંસ્મૃતિમ્ ।
નિદ્રાદ્યનન્તરોત્થેન સ્મરણેન નિરન્તરમ્ ॥ ૪૬૭॥

સ્મારાખ્યં લભતે તેન સંતતજ્ઞાનમશ્નુતે ।
editor: તેન ; સ્મારપદાભિધેયેન નિરન્તરસ્મરણેન વિજ્ઞાનમેતીત્યર્થઃ
વિજ્ઞાનેન પરાત્માનં સર્વદાનુભવત્યયમ્ ॥ ૪૬૮॥

યસ્માત્પ્રાણાદિકદ્વારા બ્રહ્માનુભવહેતુતા ।
અન્નસ્યાતો દદદ્ધ્યન્નં દદાત્યેતાનિ સર્વશઃ ॥ ૪૬૯॥

સર્વપ્રદાનરૂપત્વમન્નદાનસ્ય સમ્પ્રતિ ।
વિસ્પષ્ટયિતુમુક્તોઽર્થઃ પુનઃ સંક્ષિપ્ય કીર્ત્યતે ॥ ૪૭૦॥

અન્નાત્પ્રાણા ભવન્તીતિ વાક્યેનેત્યવગમ્યતામ્ ।
પ્રાણાદિયનિતજ્ઞાનાદાનન્દઃ પર એવ સન્ ॥ ૪૭૧॥

બ્રહ્મ દેવાન્તવેદ્યં સ્યાદ્યોનિઃ સર્વસ્ય કારણમ્ ।
યદ્વા વેદસ્ય યોનિઃ સ્યાત્તાદૃગ્રૂપઃ સ્વયં ભવેત્ ॥ ૪૭૨॥

સ વા એષ પુરુષઃ પઞ્ચધા પઞ્ચાત્મા યેન સર્વમિદં
પ્રોતં પૃથિવી ચાન્તરિક્ષં ચ દ્યૌશ્ચ
દિશશ્ચાવાન્તરદિશાશ્ચ સ વૈ સર્વમિદં જગત્સ
સભૂતꣳ સ ભવ્યં જિજ્ઞાસક્લૃપ્ત ઋતજા રયિષ્ઠાઃ
શ્રદ્ધા સત્યો મહસ્વાન્તમસોપરિષ્ટાત્
79.16 /1, internet version says પહસ્વાન્ ॥

સ્તોતું સંન્યાસમેવોક્તં તત્પ્રાપ્તજ્ઞાનસંસ્તુતિઃ ।
સંન્યાસપૂર્વકં જ્ઞાનં સમ્પાદયતિ યો નરઃ ॥ ૪૭૩॥

editor: તદિતિ ; તેન સંન્યાસેન પ્રાપ્તં તત્ત્વજ્ઞાનં યસ્ય
તસ્ય નરસ્ય સ્તુતિઃ ક્રિયત ઇત્યર્થઃ ।
સ એવ સર્વરૂપઃ સન્ પઞ્ચાત્મા પઞ્ચધા ભવેત્ ।
પઞ્ચવિંશતિરૂપઃ સ્યાદિત્યર્થઃ પરિકીર્તિતઃ ॥ ૪૭૪॥

શબ્દાદિપઞ્ચકં ચૈવ પૃથિવ્યાદિકપઞ્ચકમ્ ।
જ્ઞાનકર્મેન્દ્રિયાણાં દ્વે તથા પ્રાણાદિપઞ્ચકમ્ ॥ ૪૭૫॥

એતાવદ્વસ્તુરૂપઃ સ્યાદ્યદ્વા પઞ્ચાત્મભિર્યુતઃ ।
પઞ્ચધા વર્તતે તચ્ચ પુરાણે પરિકીર્તિતમ્ ॥ ૪૭૬॥

ભૂતાત્મા ચેન્દ્રિયાત્મા ચ પ્રધાનાત્મા તથા ભવાન્ ।
આત્મા ચ પરમાત્મા ચ ત્વમેકઃ પઞ્ચધા સ્થિતઃ ॥ ૪૭૭॥

editor: ઇત્યુક્તમિત્યર્થઃ ।
યેન બ્રહ્મસ્વરૂપેણ નરેણ સકલં જગત્ ।
પ્રોતં પ્રકર્ષતઃ સ્યૂતં સૂત્રે મણિગણા ઇવ ॥ ૪૭૮॥

પૃથિવીત્યાદિના સર્વં તદેવ સ્ફુટમુચ્યતે ।
વ્યાપી સ એવ સકલે વર્તમાનમિદં જગત્ ॥ ૪૭૯॥

તત્ત્વવિદ્યાતિરેકેણ તત્ત્વદૃષ્ટ્યા જગન્ન હિ ।
અતીતં ચ સ એવેસં ભવ્યં ભાવિ જગચ્ચ સઃ ॥ ૪૮૦॥

દૃશ્યતે દેહરૂપોઽયં જગદ્રૂપો ન હીતિ ચેત્ ।
જિજ્ઞાસયા વિચારેણ સર્વાત્મત્વેન નિશ્ચિતઃ ॥ ૪૮૧॥

ઋતં પ્રામાણિકં જ્ઞાનં જાતઃ સર્વાત્મકસ્તતઃ ।
editor: તતઃ ; જ્ઞાનેનેત્યર્થઃ ।
પૂર્વક્ષેષ્વપાસ્તેષુ જિજ્ઞાસાસમયે પુનઃ ॥ ૪૮૨॥

સિદ્ધાન્તજ્ઞાનતો જાતઃ સર્વાત્મા તત્ત્વવિન્નરઃ ।
રયિર્ગુરૂપદેશાખ્યં ધનં તત્રૈવ તિષ્ઠતિ ॥ ૪૮૩॥

ન તૂપદેશશૂન્યાનાં તત્ ક્વચિત્પ્રતિભાસતે ।
ઈદૃક્સ્વરૂપજ્ઞાનસ્ય શ્રદ્ધાલભ્યત્વતઃ પુમાન્ ॥ ૪૮૪॥

શ્રદ્ધૈવ સત્યબ્રહ્માત્મા સ્વપ્રકાશોઽત એવ સઃ ।
અજ્ઞાનેન વિયુક્તત્વાત્તદુપર્યપિ વર્તતે ॥ ૪૮૫॥

જ્ઞાત્વા તમેવં મનસા હૃદા ચ ભૂયો ન મૃત્યુમુપયાહિ
વિદ્વાન્
79.16 /2
ન્યાસપૂર્વજ્ઞાનવન્તં શ્રુત્વાહ જ્ઞાનસત્ફલમ્ ।
આરુણે ત્વં તમાત્માનં મનસા હૃદયાત્મના ॥ ૪૮૬॥

હૃદા નિયમિતત્વેન હૃદેતિ પરિકીર્ત્યતે ।
editor: હૃદા ; હૃત્પદ્મેનેત્યર્થઃ ।
એવમુક્તપ્રકારેણ સંન્યાસોત્તમહેતુતઃ ॥ ૪૮૭॥

જ્ઞાત્વા વિદ્વાઞ્જ્ઞાનયુક્તઃ પુનર્મૃત્યું ન ચાપ્નુહિ ।
વર્તમાનશરીરે ચ જ્ઞાનિનઃ પરિતે સતિ ॥ ૪૮૮॥

જન્માભાવાત્પુનર્મૃત્યુર્નાસ્તીત્યર્થઃ પ્રકીર્તિતઃ ।
તસ્માન્ન્યાસમેષાં તપસામતિરિક્તમાહુઃ
79.16 /3
બહુ પ્રશસ્તં સંન્યાસમુપસંહરતેઽધુના ॥ ૪૮૯॥

ન્યાસો યતોઽન્તરઙ્ગં સ્યાત્સાધનં તત્ત્વવેદને ।
તસ્માત્સત્યાદિતપસાં ન્યાસં સન્તોઽધિકં જગુઃ ॥ ૪૯૦॥

વસુરણ્વો વિભૂરસિ પ્રાણે ત્વમસિ સન્ધાતા બ્રહ્મન્ ત્વમસિ
વિશ્વસૃત્તેજોદાસ્ત્વમસ્યગ્નેરસિ વર્ચોદાસ્ત્વમસિ સૂર્યસ્ય
દ્યુમ્નોદાસ્ત્વમસિ ચન્દ્રમસ ઉપયામગૃહીતોઽસિ બ્રહ્મણે ત્વા
મહસે
79.17
ન્યાસોર્ધ્વં પ્રણવેનાત્મસમાધિર્યો વિધીયતે ।
તસ્મિન્ વિઘ્નનિવૃત્ત્યર્થં પ્રાહાન્તર્યામિસંસ્તુતિમ્ ॥ ૪૯૧॥

editor: આત્મેતિ ; આત્મનિ સમાધિરિત્યર્થઃ ।
અનુગ્રહાય મે બ્રહ્મન્નન્તર્યામિઞ્જગત્પતે ।
વસ્તુતત્ત્વોપદેષ્ટાસિ વસુરણ્યો વિભૂરસિ ॥ ૪૯૨॥

વિવિધં જાયમાનોઽસિ વિરાડાદિકરૂપતઃ ।
પ્રાણે વાય્વાત્મકે જીવે ત્વં સંયોજયિતાસિ ચ ॥ ૪૯૩॥

વિશ્વસૃક્સકલવ્યાપી ત્વમસ્યગ્નેઃ પ્રકાશદઃ ।
દ્યુલોકવર્તિસૂર્યસ્ય વર્ચેદાસ્ત્વં પ્રકાશદઃ ॥ ૪૯૪॥

તથા ચન્દ્રમસોઽસિ ત્વં પ્રકાશદ્રવિણપ્રદઃ ।
editor: પ્રકાશેતિ ; પ્રકાશરૂપધનપ્રદ ઇત્યર્થઃ ।
ઉપયામગૃહીતોઽસિ સોમઃ સન્યાગભૂમિષુ ॥ ૪૯૫ ।
પૃથ્વી વા ઉપયામોઽયં શ્રુતિસંકીર્તિતત્વતઃ ।
ગૃહીતઃ સોમરૂપઃ સન્મૃદ્દારુમયપાત્રતઃ ॥ ૪૯૬॥

editor: શ્રુતીતિ ; - ઉપાયામગૃહીતોઽસીત્યાહેયં વા ઉપયામઃ

-

(તૈત્તિરીયસંહિતા ૬-૫-૮) ઇત્યુક્ત ઇત્યર્થઃ । તમેવ સ્પષ્ટયતિ

—

ત્વામેવં સર્વકર્તારં મહસે બ્રહ્મણે ભયે ।
બ્રહ્માભિવ્યક્તયે દેવં સંસેવે પરમેશ્વરમ્ ॥ ૪૯૭॥

ઓમિત્યાત્માનં યુઞ્જીત
 79.18 /1
ઈશસ્તુત્યા ગતાઘસ્ય સમાધિસ્તુ વિધીયતે ।
ત્રિમાત્રં કીર્તયંસ્તારં સર્વવેદાન્તનિશ્ચિતમ્ ॥ ૪૯૮॥

સમાદધ્યાત્પરાત્માનં સ્વરૂપત્વેન ચેતસિ ।
editor: અન્તર્યામિસ્તુત્યા પરિહૃતવિઘ્નસ્ય સંન્યાસિન ઇત્યર્થઃ ।
નિશ્ચિતં ; પરમાત્માનમિત્યન્વયઃ ।
એતદ્વૈ મહોપનિષદં દેવાનાં ગુહ્યં
 79.18 /2
સમાધિસાધનં તારં સંસ્તૌતિ સકલોત્તમમ્ ॥ ૪૯૯॥

તારસ્વરૂપમેવેદં મહોપનિષદુચ્યતે ।
યસ્યોપનિષદો વન્દ્યો ભવન્તિ પ્રતિપાદિકાઃ ॥ ૫૦૦॥

મહોપનિષદેતત્સ્યાત્સર્વે વેદા ઇતિ શ્રુતેઃ ।
દેવાનાં વાસવદીનાં ગુહ્યાં ગોપ્યમિદં ભવેત્ ॥ ૫૦૧॥

શમાદિવર્જિતો યઃ સ્યાત્તસ્મૈ નોપદિશન્તિ તે ।
ય એવં વેદ બ્રહ્મણો મહિમાનમાપ્નોતિ તસ્માદ્ બ્રહ્મણો
મહિમાનમ્
 79.18 /3
એતત્સમાધિજન્યસ્ય જ્ઞાનસ્ય ફલમુચ્યતે ॥ ૫૦૨॥

સંન્યાસાનન્તરં યસ્તુ પ્રણવેન પરાત્મનઃ ।
સમાધિમાચરન્નેવં મહાવાક્યોક્તરીતિતઃ ॥ ૫૦૩॥

બ્રહ્મતત્ત્વં વિજાનાતિ સોઽપરિચ્છિન્નવસ્તુનઃ ।
મહિમાનમવાપ્નોતિ તત્ત્વવિજ્ઞાનતો હ્યયમ્ ॥ ૫૦૪॥

જીવત્વભ્રમનાશેન બ્રહ્મતાવિર્ભવે સતિ ।

જીવન્મુક્તો ભવેદ્વિદ્વાનિત્યસ્યાર્થઃ પ્રકીર્તિતઃ ॥ ૫૦૫॥

પ્રારબ્ધસ્ય ક્ષયે ભોગાચ્છરીરે પતિતે સતિ ।
તસ્માજ્જ્ઞાનાદવિદ્યાયા લેશેનાપિ વિવર્જિતમ્ ॥ ૫૦૬॥

મુખ્યં યદ્બ્રહ્મ તસ્યૈવ મહિમાનં સમશ્નુતે ।
વિદેહમુક્તો ભવતીત્યસ્યાર્થઃ પરિકીર્તિતઃ ॥ ૫૦૭॥

ઇત્યુપનિષત્ ॥

સંન્યાસપૂર્વિકાં વિદ્યામુપસંહરતેઽધુના ।
ઇત્યેવં કથિતા વિદ્યા ભવત્યુપનિષન્મતા ॥ ૫૦૮॥

રહસ્યવિદ્યા ભવતીત્યેવમર્થઃ પ્રકીર્તિતઃ ।
ઇતિ ત્રિષષ્ટિતમોઽનુવાકઃ

જ્ઞાનાન્તરઙ્ગહેતુત્વાન્ન્યાસસ્યૈવોક્તરીતિતઃ ॥ ૫૦૯॥

સ એવ યુક્તો જિજ્ઞાસોર્ન તુ કર્મેતિ કીર્તિતમ્ ।
તર્હિ સાક્ષાત્કૃતૌ કર્મ ક્રિયતામિતિ શઙ્કતે ॥ ૫૧૦॥

તચ્છઙ્કાપરિહારાય યાગરૂપત્વમુચ્યતે ।
લૌકિકવ્યવહારાણાં સર્વેષાં તત્ત્વવેદિનઃ ॥ ૫૧૧॥

યાગાધિકારશઙ્કાસ્તિ ન હિ યાગસ્ય વિદ્યતે ।
અતોઽગ્રિમાનુવાકસ્ય પૂર્વભોગેણ યોગિનઃ ॥ ૫૧૨॥

યાગદ્રવ્યસ્તયાઙ્ગાનિ પઠ્યન્તે સકલાન્યપિ ।
તસ્યૈવં વિદુષો યજ્ઞસ્યાત્મા યજમાનઃ શ્રદ્ધા પત્ની
શરીરમિધ્મમુરો વેદિર્લોમાનિ બર્હિર્વેદઃ શિખા હૃદયં યૂપઃ
કામ આજ્યં મન્યુઃ પશુસ્તપો।આગ્નિર્દમઃ શમયિતા દાનં
દક્ષિણા વાગ્ધોતા પ્રાણ ઉદ્ગાતા ચક્ષુરધ્વર્યુર્મનો બ્રહ્મા
શ્રોત્રમગ્નીત્
80.1 /1
તસ્ય સંન્યાસિનો બ્રહ્મ સાક્ષાત્કૃતવતઃ સતઃ ॥ ૫૧૩॥

જીવન્મુક્તસ્ય યો યજ્ઞસ્તસ્યાત્મા સાક્ષિલક્ષણઃ ।
સ એવ યજમાનઃ સ્યાત્તત્સ્વામિત્યેવ હેતુના ॥ ૫૧૪॥

શ્રદ્ધાખ્યા ચિત્તવૃત્તિર્યા સા પત્નીત્યાદિ યોજ્યતામ્ ।

યો દમાખ્યઃ શમયિતા સર્વાશોપશમાવહઃ ॥ ૫૧૫॥

ચિત્તવૃત્તિવિશેષોઽસ્તિ સ ભવેદત્ર દક્ષિના ।
editor: સર્વેતિ ; સર્વેન્દ્રિયોપશમકારીત્યર્થઃ ।
હોત્રાદિકસ્વરૂપત્વં વાગાદીનાં વિચિન્ત્યતામ્ ॥ ૫૧૬॥

યાવદ્ધ્રિયતે સા દીક્ષા યદશ્નાતિ
તદ્ધવિર્યત્પિબતિ તદસ્ય સોમપાનં યદ્રમતે તદુપસદો
યત્સઞ્ચરત્યુપવિશત્યુત્તિષ્ઠતે ચ સ પ્રવર્ગ્યો યન્મુખં
તદાહવનીયો યા વ્યાહૃતિરહુતિર્યદસ્ય વિજ્ઞાન તજ્જુહોતિ
યત્સાયં પ્રાતરત્તિ તત્સમિધં યત્પ્રાતર્મધ્યન્દિનꣳ સાયં
ચ તાનિ સવનાનિ
80.1 /2
જ્યોતિષ્ટોમાઙ્ગભૂતા યા ક્રિયા તદ્રૂપતોચ્યતે ।
યોગિનો વ્યવહારસ્ય ત્વનુવાકાન્યભાગતઃ ॥ ૫૧૭॥

editor: દ્વિતીયભાગમવતારયતિ—જ્યોતિષ્ટોમેતિ ।
અન્યેતિ ; દ્વિતીયભોગેનત્વિત્યર્થઃ ।
ભોજનાકરણેનૈવ યાવત્ક્ષુદ્ધાર્તેઽમુના ।
સા દીક્ષાસંજ્ઞસંસ્કારો ધૃતિરિત્યવગમ્યતામ્ ॥ ૫૧૮॥

હવિરાદિકરૂપત્વં ભોજનાદેર્વિબુધ્યતામ્ ।
યે અહોરાત્રે તે દર્શપૂર્ણમાસૌ
યેઽર્ધમાસાશ્ચ માસાશ્ચ તે ચાતુર્માસ્યાનિ ય ઋતવસ્તે
પશુબન્ધા યે સંવત્સરાશ્ચ પરિવત્સરાશ્ચ તેઽહર્ગણાઃ
સર્વવેદસં વા એતત્સત્રં યન્મરણં તદવભૃથઃ
80.1 /3
અથો તૃતીયભોગેન જીવન્મુક્તસ્ય યોગિનઃ ॥ ૫૧૯॥

તત્તત્કાલવિશેષેણ તત્તદ્યાગાત્મતોચ્યતે ।
editor: તૃતીયભાગમવતારયતિ—અથો ઇતિ ।
અત્ર સંવત્સરાશ્ચેતિ શ્રૂયમાણં ચયોગતઃ ॥ ૫૨૦॥

સંવત્સરાશ્ચેત્યેતાભ્યાં ચકારાભ્યાં શ્રુતાવિહ ।
સ્યાદિદાવત્સરાદીનાં ત્રયાણાં ચ સમુચ્ચયઃ ॥ ૫૨૧॥

પ્રભવાદિષુ ચૈકૈકં પઞ્ચકં યુગશબ્દિતમ્ ।

સંવત્સરાદિસંજ્ઞેયં ક્રમાત્તસ્મિન્મન્યુગે ભવેત્ ॥ ૫૨૨॥

editor: તદુક્તં કાલનિર્ણયે—
-ચાન્દ્રાણાં બ્રભવાદીનાં પઞ્ચકે પઞ્ચકે યુગે ।
સમ્પરીદાન્વિદિત્યેતચ્છબ્દપૂર્વાસ્તુ વત્સરાઃ ॥

- ઇતિ ।
યે દ્વિરાત્રાતિરાત્રાદ્યાસ્ત એવાહર્ગણા મતાઃ ।
સર્વસ્વદક્ષિણાકં સ્યાત્સર્વવેદસશબ્દતમ્ ॥ ૫૨૩॥

અહોરાત્રાદિકાલેન સમસ્તેનોપલક્ષિતમ્ ।
યદાયુર્યોગિનસ્તસ્માદત્રૈતચ્છબ્દકીર્તિતમ્ ॥ ૫૨૪॥

આયુસ્તદ્દક્ષિણોપેતં સત્રમિત્યર્થ ઈરિતઃ ।
એતદ્વૈ જરામર્યમગ્નિહોત્રꣳ સત્રં ય એવં વિદ્વાનુદગયને
પ્રમીયતે
દેવાનામેવ મહિમાનં ગત્વાદિત્યસ્ય સાયુજ્યં ગચ્છત્યથ યો
દક્ષિણે પ્રમીયતે પિતૃણામેવ મહિમાનં ગત્વા ચન્દ્રમસઃ
સાયુજ્યં ગચ્છત્યેતૌ વૈ સૂર્યાચન્દ્રમસોર્મહિમાનૌ બ્રાહ્મણો
વિદ્વાનભિજયતિ તસ્માદ્ બ્રહ્મણો મહિમાનમિત્યુપનિષત્
80.1 /3
ચતુર્થભાગેનૈતસ્ય સર્વયજ્ઞાત્મકં મુનિમ્ ॥ ૫૨૫॥

ઉપાસીનસ્ય મર્તસ્ય ક્રમમુક્તિરુદીર્યતે ।
editor: અનુવાકાન્ત્યભાગમવતારયતિ—ચતુર્થેતિ ।
યોગીશ્વરસ્ય ચરિતં યજ્જરામરણાવધિ ॥ ૫૨૬॥

તદ્વેદોક્તોઽગ્નિહોત્રાદિસત્રાન્તાખિલકર્મ હિ ।
ઇત્યુપાસનશીલઃ સન્ મૃતઃ સ્યાદુત્તરાયણે ॥ ૫૨૭॥

સ દેવાતાનામૈશ્વર્યં સમ્પ્રાપ્ય તદનન્તરમ્ ।
ભાવનાતારતમ્યેન રવેસ્તાદાત્મ્યમશ્નુતે ॥ ૫૨૮॥

અથોપાસનશીલો યો મ્રિયતે દક્ષિણાયને ।
સોઽગ્નિષ્વાત્તાદિકૈશ્વર્યં પ્રાપ્યૈતીન્દુસરૂપતામ્ ॥ ૫૨૯॥

editor: એતીતિ ; ઇન્દુસાયુજ્યમેતીત્યર્થઃ ।
મહિમાનાવનુભવન્નેતાવાદિત્યસોમયોઃ ।

વિદ્વાન્હિરણ્યગર્ભં ચ તલ્લોકસ્થોપદેશતહ્ ॥ ૫૩૦॥

editor: તલ્લોકસ્થેતિ ; તલ્લોકવાસિનાભુપદેશત ઇત્યર્થઃ ।
તત્સાક્ષાત્કૃતિરૂપં ચ જયં પ્રાપ્નોત્યયં દ્વિજઃ ।
editor: તદિતિ ; હિરણ્યગર્ભસાક્ષાત્કારરૂપમિત્યર્થઃ ।
તત્સાક્ષાત્કારતો વિપ્રસ્તલ્લોકસ્થવપુઃક્ષયાત્ ॥ ૫૩૧॥

તલ્લોકં પ્રાપ્ય તત્રાસ્ય મહિમાનં સમશ્નુતે ।
editor: શરીરપાતાદૂર્ધ્વમિતિ શેષઃ । તલ્લોકમ્ ;
હિરણ્યગર્ભલોકમિત્યર્થઃ ।
અસ્ય ; હિરણ્યગર્ભસ્યૈશ્વર્યમ્ ।
તત્રોત્પન્નાત્પરેશસ્ય સાક્ષાત્કારાત્સ ચ દ્વિજઃ ॥ ૫૩૨॥

તલ્લોકનાશાદૂર્ધ્વં યત્સત્યજ્ઞાનાદિલક્ષનમ્ ।
બ્રહ્મ તસ્ય મહત્ત્વાખ્યં મહિમાનં સમશ્નુતે ॥ ૫૩૩॥

ઇતીત્યનેન વિદ્યાયાસ્તદ્ગ્રન્થસ્યોપસંહૃતિહ્ ।
editor: તદ્ગ્રન્થસ્યેતિ ; તત્પ્રતિપાદકગ્રન્થસ્યેત્યર્થઃ ।
તૈત્તિરીયેઽસ્તિ પુંવિધા તસ્યૈવમિતિ વાક્યતઃ ॥ ૫૩૪॥

પુરુષો વેતિ વાક્યેન શાખાયાં તાણ્ડિનામપિ ।
ભેદકસ્યોપલમ્ભેન સ્વવોભિન્નૈવ યુજ્યતે ॥ ૫૩૫॥

પુંયજ્ઞયોસ્તાણ્ડિનાં હિ સામાનાધિકરણ્યગીઃ ।
ન તથા તૈત્તિરીયે સ્યાત્તત્ર ષષ્ઠ્યોઃ શ્રુતત્વતઃ ॥ ૫૩૬॥

સામાનાધિકરણ્યે ચ ષષ્ઠ્યોર્વ્યાહતિરેવ હિ ।
વિદુષો યજમાનત્વં યજ્ઞત્વં હિ વિરુધ્યતે ॥ ૫૩૭॥

editor: વિદુષો યો યજ્ઞસ્તસ્ય યજ્ઞસ્યાત્મેતિ વ્યધિકરણે ષષ્ઠ્યૌ ।
અન્યથા
વિદ્વાનેવ યજ્ઞઃ ; સ એવ યજમાન ઇતિ વ્યાહતિઃ સ્યાત્ ।
તાણ્ડિશાખાયાં
તુ - પુરુષો વા વ યજ્ઞઃ - ઇતિ સામાનાધિકરણ્યમ્ ।
અતો ભેદકોપલમ્ભાદ્ભેદ ઇત્યર્થઃ ।
યદાત્મજયમાનાદિ શ્રુતં તત્તાણ્ડિનાં ન હિ
આયુષસ્ત્રિવિધસ્યાપિ સવનત્રયરૂપતા ॥ ૫૩૮॥

ઇત્યાદિ તાણ્ડિનાં યત્તુ ન હિ તત્તૈત્તિરીયકે ।
મરણાવભૃથત્વાદિ કિંચિત્સામ્યપ્રબાધનાત્ ॥ ૫૩૯॥

વિદ્યયોર્ભેદ એવાતો ન્યાય્યો નૈવ ત્વભિન્નતા ।
કિંચ નોપસસનમિદં તૈત્તિરીયે પ્રકીર્તિતમ્ ॥ ૫૪૦॥

કિં તર્હિ બ્રહ્મવિદ્યાયાઃ પ્રશંસા પરિકીર્ત્યતે ।
તસ્માદ્વિદ્યૈક્યશઙ્કાયા નાવકાશોઽસ્તિ કશ્ચન ॥ ૫૪૧॥

ક્રમમુક્તિફલં ત્વસ્મિન્નનુવાકે પ્રકીર્તિતમ્ ।
તત્ત્વજ્ઞસેવાસંભૂતમિત્યશેષં ચ મઙ્ગલમ્ ॥ ૫૪૨॥

ઇતિ ચતુઃષષ્ટિતમોઽનુવાકઃ
વિદ્યારણ્યમુક્તિપ્રોક્તબૃહદ્વ્યાખ્યાનુસારતઃ ।
પુરુષોત્તમતીર્થેન ગ્રન્થવિસ્તરભીતિતઃ ॥ ૫૪૩॥

યાજ્ઞિક્યાં કતિચિન્મન્ત્રા વ્યાખ્યાતાઃ પદ્યરૂપતઃ ।
યથોપયોગમેવાત્ર સંગ્રહેણ યથામપિ ॥ ૫૪૪॥

વિદ્યારણ્યૈઃ સમસ્તેયં વ્યાખ્યાતા યાજ્ઞિકી શુભા ।
આરભ્ય રુદ્રગાયત્રીં દ્રાવિડઃ પાઠ આદૃતઃ ।
તતઃ પૂર્વં તુ તૈઃ સર્વે તત્તત્પાઠાઃ સમાદૃતાઃ ॥ ૫૪૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીશિવરામાનન્દતીર્થશિષ્ય
શ્રીપુરુષોત્તમાનન્દતીર્થવિરચિતં યાજ્ઞિક્યુપનિષદ્વિવરણં સમાપ્તમ્ ।

Note
Read યસ્માત્ in the shloka following verse 195
Read ઇતિ ... અનુવાકઃ for ઇતિ ... અધ્યાયઃ around
verses 337 till 351
Add ઇત્યષ્ટાચત્વારિંશોઽનુવાકઃ just after verse 366

Encoded and proofread by Wim en Esther wkl-evdk at knoware.nl
Yajniki Upanishad encoded by Sunder Hattangadi
as Mahanarayana Upanishad.

According to Sw. Vimalananda, who has translated the Mahanarayana
Upanishad (Ramakrishna Math publ.), it is also known as
Yajniki Upanishad on the ground that Yajnatma Narayana is

considered to be the seer of this part of the Veda॥
(Krishna Yajurveda). This upanishad forms the tenth (last)
prapathakas (Sayana's term), or prasna (Bhattabhaskara's term) of the
Taittiriya Aranyaka. It is also called 'khila' (supplementary) as it
deals with many rituals in daily use. There is a 'dravidapatha' and
'andhrapatha' with 64 and 80 chapters resp.!
The text is not the same in many recensions of the upanishads.

'The yAj nikyupaniShad with a commentary in the form of kArikas by
shrIpuruShottamAnandatIrtha is based
on a single manuscript found in the Adyar Library.
The yAj nikyupaniShad is also known as nArAyaNopaniShad. There is the
mahAnArAyaNopaniShad belonging to the atharvaveda. edited by Col. Jacob,
which has been utilised by Bloomfield in preparing his Vedic Concordance.
The latter is only another version of this yAj nikyupaniShad.

The taittirIyayajurveda is divided into the sa.nhitA and the brAhmaNa
portions. The brAhmaNa has the three prapAThakas for the main brAhmaNa
portion, and then the AraNyaka portion. SAyana divides the AraNyaka into
ten prapAThakas, and the three prapAThakas, 7 to 9 form what is well known
as the taittirIyopaniShad. The next one is accepted as a khila
(supplement) and that is the yAj nikyupaniShad. BhaTTabhAskara takes the
whole of the TaittirIyopaniShad as a single prashna, and there is also a
slight difference in him from the arrangement of the prashnas found in
sAyaNa. Otherwise the texts are the same.'

*Yajnikyupanishad Vivarana, commentary*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*